॥ ओ३म् ॥
शौर्यमदो भुजदर्शी रूपमदो दर्पणादिदर्शी च ।
काममदः स्त्रीदर्शी विभवमदश्चौव जात्यन्धः ॥
– कलाविलास, 6.6
निवृत्तिः कर्मणः पापात्सततं पुण्यशीलता ।
सद्वृत्तिः समुदाचारः श्रेय एतदनुत्तमम् ॥
मानुष्यमसुखं प्राप्य यः सज्जति स मुह्यति ।
नालं स दुःखमोक्षाय संगो वै दुःखलक्षणः ॥
–नारदपुराण पू० ६०.४४–४५

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23
Posting Date.: 4-5, 19-20 of Every Month
सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ।
– पञ्चतन्त्र, 2.4
समुद्र इव कामः न वै कामस्य अन्तोऽस्ति न समुद्रस्य।
– तै.ब्रा. 2.2.5.6
सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम्! आपत्सु च महाशैलशिलासङ्घातकर्कशम्!!
भर्तृहरिः( नीतिशतकम् )

卐 वर्षम्-१३ 卐 अंकः-१० ( २९८ ) नवदेहली 卐 १६ नवम्बरमासः २०२३तः ३० नवम्बरमासः २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## प्रख्यातसाहित्यकारः आचार्य-राधावल्लभत्रिपाठी 'मानवी' बालउपन्यासाय साहित्यअकादेमी द्वारा 'बालसाहित्यपुरस्कारेण-२०२३' इत्यनेन अलंकृतः

नवदेहली। (अजयकुमारमिश्रा)। साहित्यअकादमी, संस्कृतिमन्त्रालयः,भारतसर्वकारः 2023 तमस्य वर्षस्य संस्कृतबालसाहित्यपुरस्कारः, लब्धप्रतिष्ठः संस्कृत कविः ,नाट्यकारः, उपन्यासकारः आचार्यराधावल्लभत्रिपाठिनः यच्चर्चित संस्कृतबाल





-उपन्यासाय 'मानवी' इत्यस्मै त्रिवेणीसभागारे आयोजिते एकस्मिन् कार्यक्रमे अलंकृतः। प्रख्यातसाहित्यकाराणां साहित्यप्रेमिणां समक्षं सभागारेऽस्मिन् संस्कृतसाहित्येन असमिया, बांग्ला, बोडो, डोगरी, अंग्रेजी, गुजराती, हिंदी, कोंकणी, मैथिली,मलयालम्, मणिपुरी, मराठी, नेपाली ओड़िआ, पंजाबी, राजस्थानी, संताली, सिंधी, तमिल, तेलुगु, उर्दू इत्येषां साहित्यस्य बाल साहित्यरचनाकाराः अपि पुरस्कृताः।

उल्लेखनीयम् आचार्यराधावल्लभत्रिपाठी अनुपम कृतिषु अस्यै नवाचारिणां, जीवन्त बिम्बानां च माध्यमेन रघु नाम्नः एकं बाल चरित्रं अत्यंतं मनोहारी अंकनं प्रस्तुतवान् ।

बालसाहित्य सृजनेन भारतीय मूल चिंतनस्यापि श्रीवृद्धिर्भविष्यति। भव्यसमारोहस्यास्य पुरस्कृतविदुषां स्वागतक्रमे साहित्यअकादेमी सचिवः श्री के. श्रीनिवासरावः बालेभ्योत्यन्तं मनोरंजकं प्रतिपादितवान्। साहित्यअकादेमी अध्यक्षः आचार्य माधवकौशिकः पुरस्कार विजेतणाम् उद्बोधनेबाल साहित्यस्य रचनाधर्मिता भविष्यद् भारतस्य निर्माणम् उक्तवान् । तेन कथितंबालसाहित्यं, साहित्य भविष्यम् । समारोहे मुख्यअतिथिरुपेण अंग्रेजी-हिन्दी भाषयोः लब्धप्रतिष्ठः विद्वान् प्रो हरीशत्रिवेदी आंग्लकवि वर्सवर्थम् आधृत्य उक्तवान् यत् मनुष्ये यावत् बाल्यं तावत् स्वर्गः इव जीवनम्। साहित्यअकादेमी उपाध्यक्षः प्रो कुमुदशर्मा धन्यवादज्ञापने बालसाहित्यलेखनस्य ऊष्मा च प्रत्यपादयत्। कालजयी उपन्यासः 'मानवी' रचनापक्षी विशेषज्ञ पद्मश्री सलीमअली इत्यस्मै समर्पितः। परम् अस्मिन् उपन्यासे सलीम नाम्नः चरित्रं यदस्ति तेन पद्मश्री अलीवर्यस्य काचित् सम्बद्धता नास्ति। अवसरेस्मिन् नैके विद्वांसः कवयः छात्राः अकादमी पदाधिकारिणः समुपस्थिताः।

## पतञ्जलि-आयुर्वेदमहाविद्यालयेन धन्वन्तरि-जयन्ती ( आयुर्वेददिवसः ) आयोजितः

हरिद्वारम्। पतंजलिभारतीयआयुर्विज्ञान एवं अनुसंधानसंस्थान (पतंजलिआयुर्वेदमहाविद्यालय) इत्यनयोः तत्वाधाने धन्वंतरि जयंत्याः पूर्व संध्यायाम् 'आयुर्वेददिवसः' आयोजितः । यत्र पतंजलियोगपीठस्य महामंत्री आचार्य बालकृष्णः कथितवान् आयुर्वेदः सर्वविद् रूपेण सर्वव्यापी विश्वव्यापी च भवेदित्येतदर्थं महद् अभियानं पतंजलि माध्यमेन




गतिमानम्।

अवसरेस्मिन् पतंजलिआयुर्वेद महाविद्यालयस्य परीक्षासु अग्रणिनः छात्र-छात्राः पुरुस्कृताः कार्यक्रमे आचार्येण कथितं यत् पतंजलिः प्राकृतिक आपत्सु मानवता सेवायां समर्पितः । क्रमेस्मिन् पतंजलि द्वारा नेपाले भूकम्प पीड़ितानां सहायतार्थं 7 भारवाहकेषु अपेक्षित खाद्य सामग्री प्रेषिता।

कार्यक्रमे पतंजलिविश्वविद्यालयस्य प्रति-कुलपतिः प्रो. महावीरअग्रवालः, पतंजलि आयुर्वेदमहाविद्यालयस्य प्राचार्यः प्रो. अनिलकुमारः, डॉ. प्रत्युषसिंहः, डॉ. दयाशंकर सिंहः, डॉ. अरूणपाण्डेय , डॉ. राजेशमिश्रः, डॉ. श्वेतासाहनी, डॉ. विभूतिः च एत्येते छात्र-छात्राश्च उपस्थिताः।

## एकादशी-श्रीमद्भगवद्गीता-राष्ट्रिय-व्याख्यानगोष्ठ्याः द्वाविंशः पर्यायः सुसम्पन्नः

वृत्तप्रेषिका-डॉ. नेहामिश्रा

('संसारे पुनः पुनर्जन्मनः कारणं तृष्णा अस्ति' प्रो.वाङ्चुक दोर्जे नेगी, कुलपतिः केन्द्रीय उच्च तिब्बती शिक्षा संस्थानम्, सारनाथः।)
चातुर्वेद-संस्कृतप्रचार-संस्थानम् काशी, केन्द्रीय उच्च तिब्बती शिक्षा




संस्थानम् सारनाथ-वाराणसी, श्रीसीताराम वैदिक आदर्श संस्कृत महाविद्यालयः कोलकाता, इत्येतेषां संयुक्ततत्त्वावधाने आनलाइन एकादशी-तिथीया श्रीमद्भगवद्गीता-राष्ट्रियव्याख्यानगोष्ठी सुसम्पन्ना अभूत्। अस्यां गोष्ठ्यां सभाध्यक्षः प्रो० वाङ्चुक दोर्जे नेगी कुलपतिमहोदयोवदत् यत् मनुष्याणां संसारे पुनर्जजन्म तृष्णायाः कारणात् भवति। तृष्णात्रये कामतृष्णा या च भौतिकलिप्सायां बद्धवा पुनर्जन्मने बाध्यं करोति। तृष्णाया दासो न भवेम अतो धर्मानुशीलनम् अवश्यं कर्तव्यम्। धर्मो नाम स्वस्वरूपाचरणम् अथवा कस्यापि वस्तुनः तत्त्वविशेषग्रहणं भवति। मुख्यवक्ता काशीहिन्दूविश्वविद्यालयीय-धर्मशास्त्रमीमांसाविभागस्य अध्यक्षः प्रो. माधवजनार्दन रटाटे महोदयः श्रीमद्भगवद्गीतोक्तधर्मस्वरूपविमर्शः इति विषये व्याख्यातवान् यद् 'धर्मो रक्षति रक्षितः' धर्म एव मनुष्याणां पशुभिः पार्थक्यं करोति । भगवान् श्रीकृष्णः अर्जुनाय स्वधर्मविषये विशेष रूपेण उपदेशं कृतवान् 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' अतः स्वकार्यं, दायित्वं वा निष्ठापूर्वकं यः सम्पादयति। एव धर्मानुगो भवति। आयोजकमहाविद्यालयतो विशिष्टवक्ता वैयाकरणो डॉ सुधाकरमिश्रमहोदयः 'पापं चरति पूरुषः' इति विषयेवदत् यत् कामस्य त्रीणि रूपाणि सूक्ष्मा, स्थूला, अतिसूक्ष्मावस्थेति। मनुष्यः कामानां वशीभूत्वा पापं चरति। अतः निष्कामरूपेण कर्माचरणाय गीता उपदिशति। स्वागतभाषणम् अकरोत् आयोजकविश्वविद्यालयीयशब्दविद्यासंकायाध्यक्षः महावैयाकरणः प्रो धर्मदत्तचतुर्वेदी महोदयः। वैदिकमंगलाचरणमकरोत् श्री भैरवपाठकः । गीताश्लोकपाठस्य प्रस्तुतिः अकरोत् श्रीप्रियांशु तिवारी। संयोजनसमितिसदस्यः डॉ प्राङ्गेशकुमारमिश्रमहोदयः गोष्ठ्याः सञ्चालनम् अकरोत्। धन्यवादज्ञापनमकरोत् डॉ शशिभूषण मिश्रः। संयोजनमकरोत् डॉ. चन्द्रकान्तदत्तशुक्लः। कार्यक्रमेऽस्मिन् प्रो.राजेश्वर शास्त्री मुसलगांवकरः, डॉ अवनीन्द्रपाण्डेयः, ममतामिश्रा, डा. मूलचन्द्रशुक्लः, डॉ. आभा द्विवेदी, प्रो.मञ्जुलता शर्मा, डा. गीता शुक्ला, डा.धनञ्जयमणि त्रिपाठी, डा.अम्बरीषमिश्रः, डॉ अरविन्दतिवारी, डा.जी.नरसिंहुलु, डॉ. पंकजनाथः, डॉ. सर्वेश शाण्डिल्यः, डॉ. रितेशचतुर्वेदी, डॉ. सन्ध्या ठाकुर, मधु, महक, बेलाल, अनीता, प्रिया, आंचल, नन्दिनी, प्रियंका, अखिलेश प्रभृतयो बहवः जिज्ञासवः समुपस्थिता आसन्।

# काशीशास्त्रपरम्परा

(वत्स-देशराज-शर्मा)

महच्छास्त्रार्थपरम्परामावहन्तीयङ्काशी भारतभुवोगाधभारतीयज्ञानन्तनीति विदितचरमेवेदं विदुराणाम्। यद्विद्याविलासेनैव यत्र तत्र सर्वत्रापि स्थिता विद्वांसो राराज्यन्ते तद्विद्यानगरी कस्या:विद्वन्मतल्लिकाया: न



प्रथमप्रश्रय: । तत्र भवति काशीहिन्दूविश्वविद्यालयस्य मालवीयभवने श्रीकाशीशास्त्रार्थसभा महनीया। यस्या आध्यक्ष्यं कुर्वन्ति श्रीराजाराशुक्लमहाभागा:, मुख्यातिथित्वं श्रीभगवत्शरणशुक्ला:। तत्र च विषयेषु वक्तुं वक्तार:विद्वांसो निर्धारिता:। व्याकरणे श्यामराज्यगुरुरमितोपाध्यायश्च, न्याये सात्त्विक:, उत्तरमीमांसायाञ्चास्माकं भारतवर्षस्य कविप्रतिष्ठितस्य वैदिकगणस्य नेपालदेशीया:वैदिकगणाध्यक्षा: प्रवीणपौडेलमहाभागा:। एवं सर्वेपि स्वस्वविषयकं शास्त्रार्थं वाक्यार्थं वा होरात्रयं यावत् पूरयामासु:।

तत्र च अनेके विशेषज्ञा:, पदवाक्यप्रमाणपारावारीणा: विद्वद्वरेण्या:शुश्रूषव उपस्थिता आसन्। अलौकिकीं विद्वत्कलां प्रद्योतयन्त्येतादृशी सभा सततं वर्धताम्। जयन्तु काशीस्था: विद्वांस:। जय विश्वनाथ।

## तिरुपति-राष्ट्रियसंस्कृत - विश्वविद्यालये साहित्यविभागे एकदिवसीय - शिक्षक - विकासकार्यक्रम:



तिरुपति। दि०१-११-२०२३ बुधवासरे तिरुपति-राष्ट्रियसंस्कृत-विश्वविद्यालये साहित्यविभागे एकदिवसीय - शिक्षक-विकासकार्यक्रम: (Faculty Development Programme) समनुष्ठित:। सम्प्राप्तराष्ट्रपतिसम्माना: महामहोपाध्याया: प्रोफेसर कोम्पेल्लरामसूर्यनाराणमहाभागा: मुख्यातिथिरूपेण समुपस्थाय रसगङ्गाधरस्य विहङ्गवीक्षणम् तथा रूपके लक्षणा इति विषये उद्बोधितवन्त:। कुलपतय: महामहोपाध्याया: प्रोफेसर जि. यस्. आ.र् कृष्णमूर्तिमहोदयाश्च ध्वन्यालोकस्य विषये उद्बोधितवन्त:। शैक्षिकसङ्कायाध्यक्ष: प्रो. टि. वी. राघवाचार्य:, साहित्य-संस्कृतिसङ्कायाध्यक्षा प्रो. सि. ललिताराणि:, साहित्यविभागाध्यक्ष: प्रो. सि. ललिताराणि, कुलानुशासक: प्रो. सत्यनारायण आचार्यस्तथा सर्वे आचार्या: छात्राश्च समुपस्थिता:।

## छन्दोगानस्य आधार: लय: गतियतियुक्ता:-श्री विशालभट्ट:

(वार्ताहरी-नीतू, लखनऊ)

प्रसन्नताविषयकम् अस्ति यत् नवदिनाङ्कत: आभासीयमाध्यमेन सञ्चाल्यमान: संस्कृतच्छन्दस: कार्यशालाया: आयोजनं मम संस्कृतम् ( My Sanskritam) इति नाम्न: यूनलिका गूगलमीट ,यूट्यूब इत्यादि अन्तर्जालीय सञ्चारण माध्यमेन श्री मान् गोपालकृष्णमिश्र महोदयेन द्वारा 31 अक्टूबर 2023 पर्यन्तं नि:शुल्कम् अभवत्।

इयं कार्यशालायां प्रत्येकस्मिन् दिवसे संस्कृतजगत: प्रसिद्धसाहित्यकार: कवि: लेखक: च भारतीयवैदेशिका: विद्वांस: च अपि स्वस्य रत्नजटित बहुमूल्यज्ञानम् एवं समयं च कार्यशालां दत्तवन्त:। विदुषां व्याख्यानं तु सहृदयानां हृदयेषु संस्कृतसाहित्यं पद्यं छन्दसं रचनां च प्रति प्रेरणां-प्रदानम् अकरोत्। अस्मिन् क्रमे सप्तदश सत्रे अन्तिमे सत्रे अनौपचारिक: संस्कृतशिक्षक: केन्द्रीयसंस्कृतविश्वविद्यालय: नवदेहलीस्थ आचार्येन विशालभट्टमहोदयेन आनलाईनमाध्यमेन छन्दसां गानोभ्यास: लयपूर्वक: कारित:। महोदयेन प्रतिभागिनां कृते अपि सुअवसरं दत्तवान्। ते अपि छन्दस: गतदिवसे यं ज्ञानं प्राप्तवन्त: तेषाम् अभ्यासं कृतवन्त:।

जन्मदिवस्य शुभकामना:



डॉ. हेमंतकृष्णमिश्र:
प्राचार्य:
सेठश्रीसूरजमलतापड़िया
आचार्य- संस्कृतमहाविद्यालय:
जसवंतगढम् राजस्थानम्

# बालभारतीपब्लिकविद्यालये अन्ताराष्ट्रिया-संस्कृतोत्सवप्रदर्शनी समुद्घाटिता

नवदेहली (डॉ.युवराजभट्टराई)। दिल्ल्यां सर गंगाराम चिकित्सालय मार्ग-स्थे बाल भारती पब्लिक स्कूल इत्याख्ये प्रशासनेतर विद्यालये त्रिदिवसीय अन्ताराष्ट्रिय-संस्कृतोत्सव-प्रदर्शन्या: भव्यं उद्घाटनम् 03. 11.2023 तमे दिनाङ्के शुक्रवासरे सञ्जातम्। प्रधानाचार्यस्य श्री एल वी सहगलस्य दिङ्निर्देशे अस्यां प्रदर्शन्यां आधुनिक-विश्वस्य उद्देश्यस्य अनुरूपमेव आधुनिक-दृशा छात्राणां ज्ञानाभिवृद्धये, संस्कृतस्य



अध्ययनम्प्रति तेषाम् अभिप्रेरणाय च विविधा: उपाया: प्रकल्पिता: सन्ति। अथ च प्रदर्शन्या: औद्घाटनिकसत्रे अस्माकं प्राचीन-विद्वत्-प्रवरै: ऋषि-मुनिभि: विरचितस्य विपुल-वाङ्मयस्य संरक्षणाय चापि विचार-विमर्श-पूर्वकं प्रतिष्ठितै: विद्वद्भि: मार्गदर्शनं कृतम्। एष: कार्यक्रम: दिल्लीस्थ-प्रशासनेतर-विद्यालयेषु संस्कृत-भाषाया: संवर्धनार्थम् विभिन्न माध्यमेन बलवत्तरं सहयोगं प्रदाय समेषां मार्ग-प्रशस्ती-करणम्



अपि करिष्यति।अद्य यदा वयम् एकविंश्यां शताब्द्यां वैश्वी-करणं भूमण्डलीकरणं च सम्मुखी-कुर्म: तदा अस्मिन् विचित्रे विशिष्टे च सामाजिक-परिवेशे संस्कृतस्य का भूमिका विश्वमञ्चे भवेद् इति विषये एष: बाल भारती विद्यालय: सुबहु-स्तरीयं मानकं च कार्यं विदधाति तदन्तर्गतमेव एषा अन्ताराष्ट्रिया प्रदर्शनी अपि वर्तते।

अनेन भव्य आयोजनेन संस्कृत-विषयाणां माहात्म्य-बोधन-पूर्वकं छात्रा: संस्कृताध्ययनोत्सुका: संस्कृता-ध्ययन-शीला: च भूत्वा निजोत्कर्षम् अनुभविष्यन्ति इति तत्र समागतै: विद्वद्भि: प्रोक्तम्।

संस्कृत-भाषा-प्रणीतानां वेद-वेदाङ्ग-उपनिषद्-ब्राह्मण- आरण्यक-धर्मशास्त्र-पुराण-इतिहास-दर्शन- योग-आयुर्वेद-शिल्प-वास्तुशास्त्र-अर्थशास्त्र-खगोल-भूगोल चेत्यादि-विषया: चापि तत्र प्रदर्शिता: सन्ति। अस्मिन् प्रदर्शनी कार्यक्रमे विभिन्न-विद्यालयानां संस्कृत-शिक्षका:, छात्रा:, अभिभावका:, अन्वेषका:, संस्कृतानुरागिण: च उपस्थिता: आसन्। अस्मिन् कार्यक्रमे संस्कृति मन्त्रालयस्य अन्तर्गतम् इन्दिरा-गान्धि-राष्ट्रिय-कला-केन्द्रस्य भारत-विद्या-परियोजना विभागस्य अध्यक्ष: आचार्य: प्रोफेसर आर्य-भूषण-शुक्ल-महोदय: प्रमुखातिथित्वेन उपस्थाय निज प्रेरक-वचोभि: छात्रान् भारतीयां शिक्षा व्यवस्थां बोद्धुं प्रैरयत। अथ च दिल्ली विश्वविद्यालयस्यान्तर्भूतस्य हिन्दू-महा-विद्यालयस्य संस्कृत-विभागस्य सहायकाचार्य: डॉ. सुनील: जोशीवर्य: अत्र संस्कृते विज्ञानम् इति विषये नैजं वैदुष्यपूर्णम् वक्तव्यं प्रदाय छात्रान् अभिप्रेरितवान्। संस्कृत भारती संस्थाया: प्रान्त-मन्त्री देवकी-नंदन-महाभाग: विशिष्टातिथित्वेन कार्यक्रमस्य शोभां वर्धितवान्। अस्यां प्रदर्शन्याम् संस्कृत वाङ्मये निहिता: ज्ञान-विज्ञान-अध्यात्म-नाट्य- संगीत-नृत्-योग-आयुर्वेद-चित्रकला-मूर्तिकला प्रभृतिभि: भूरि विषयै: साकं दैनिक-प्रयोग-वस्तूनि अपि संस्कृते प्रदर्शितानि आसन्। अस्या: प्रदार्शन्या: आयोजनाय उपप्रधानाचार्या श्रीमती विनीताधवनवर्या मुख्याध्यापिका श्रीमती नीता निझारा वर्या चापि मार्गदर्शनं कृतवत्यौ। ध्येयम् अस्ति यत् एषा प्रदर्शनी विंशस्त्युत्तर-द्वि-सहस्र-तम-वर्षस्य नूतन-राष्ट्रिय-शिक्षानीते: अनुरूपमपि अस्ति यस्मिन् भारतीय-ज्ञान-प्रणाली-सम्घ्पदाया: आधुनिक-ज्ञान-प्रणाल्या: च एकीकरणे बलम् प्रदत्तम् अस्ति। अस्या: प्रदर्शन्या: द्वितीयं सत्रम् आभासीयम् आसीत् यत्र विश्वमानितस्य ऑक्सफोर्ड-विश्व-विद्यालयस्य भारतीय-दर्शन-प्राच्यविद्या-विभागस्य स्पोल्डिंग प्रोफेसर-पदे कार्यपर: श्रीयुत: दिवाकर: आचार्य: मुख्यातिथित्वेन उपस्थाय विदेशेषु संस्कृतस्य विवर्धमानाया: लोकप्रियताया: विषये छात्रान् प्रावोचत्। अपि च बाल भारती-पब्लिक-विद्यालयस्य प्राक्तनच्छात्र: नीतीशराय: परवाणी अपि निज प्रेरक-बोधनेन छात्रान् संस्कृताध्यायनाय प्रेरितवान्। छात्रै: प्रश्न-माध्यमेन निज-जिज्ञासा: अपि विदुषां पुरत: उपस्थापित:। कार्यक्रमे दिल्लीस्थानाम् अन्येषां प्रशासनेतर विद्यालयानां शिक्षका: छात्रा: अपि उपस्थिता: आसन्। सहैव भूरि संख्यायां छात्राणाम् अभिभावका: अपि उपस्थिता: आसन्।

# उत्तराखंड-विद्वद्सभया समायोजिता विद्वद्गोष्ठी

देहरादूनम् । ( धीरजमैठाणी) तत्र आजीवनसदस्यानां प्रपत्राणि, कोषस्य अभिवृद्धये दत्ताहुतिभ्यः कार्तज्ञं, वार्षिक अमृतकुम्भस्मारिका पत्रिका, सदस्यानां समायोजनं च इत्येतान् विषयान् आधृत्य समाजितायां गोष्ठ्याम् आध्यक्ष्यं सभाध्यक्षेण विजेंद्रममगाईवर्येण, मुख्यातिथित्वं प्रीतिसम्पादनं च पूर्वपदाधिकारिभ्यां रमेशचन्द्रभट्टेन, डॉ सन्दीपरतूडिना च चर्चितम्। मंगलाचरणं सहसचिवेन मुरलीधरसेमवालेन कृतम्। अवसरेस्मिन् प्रवक्ता मुकेशपन्तः, संघटनसांस्कृतिकसचिवः सुभाषचमोली, परामर्शकः राजेश अमोली कार्यकारिण्यां



भरतरामतिवारिणा, विशिष्टातिथित्वं पवनशर्मणा, मार्गदर्शनं चंद्रप्रकाश ममगाईमहादयेन, विषयोपस्थापनं उपाध्यक्षेण सत्यप्रकाशसेमवालेन, संयोजकत्वं मंचसंचालनं च महासचिवेन दिनेशप्रसादभट्टेन, सहसंयोजकत्वं कोषाध्यक्षेण अजयडबरालेन च विहितम्। वक्तृभिः भूमिविषये, संघटनविषये, कोषाभिवृद्धौ च स्वीयविचाराः अभिव्यक्ताः। तत्र मुख्यतया समयेन पत्रिकासम्पादनं, सदस्यानां संख्यावर्धनं, परस्परं राजेश्वरसेमवालः, दीपकअमोली, मुरलीमनोहरथपलियाल, परशुरामउनियालः, आदित्यरामथपलियालः, भुवनेशथपलियालः, रवीन्द्रडङ्गवालः, धीरजमैठाणी च उपस्थाय विशेषभूमिकां निरवहन्। अवसरेस्मिन् आचार्यगणे योगेशसेमवालः, मनोजथपलियालः, मदनमोहन मैठाणी, रमेशचंद्रभट्टः, अनिलसकलानी, वेदाचार्यो मंत्रीप्रसाद थपलियालः इत्यादयः सदस्याः उपस्थिताः आसन् ।

# चौधरीचरणसिंहविश्वविद्यालये दीपांशी स्वर्णपदकेन सम्मानिता

वार्ताहरः - सचिन शर्मा , मोदीनगर , गाजियाबाद उ.प्र.

चौधरीचरणसिंहविश्वविद्यालयस्य अन्तर्गतं परिसरे अध्ययनं कुर्वती दीपांशी त्यागी नामका छात्रा संस्कृतविषयेण सह स्नातकोत्तरे ८६



प्रतिशतं अंकं प्राप्य स्वर्णपदकं प्राप्तवती । सा कुलपतिस्वर्णपदकेन विशेषयोग्यप्रमाणपत्रेण च पुरस्कृता ।

संस्कृतक्षेत्रे तस्याः उपलब्धिः तस्याः अथकपरिश्रमस्य परिणामः एव । अनेन तस्य परिवारे रहदराग्रामे च सुखस्य वातावरणं निर्मितम् अस्ति । अस्मिन् अवसरे पिता श्यामनारायण त्यागी माता ममता त्यागी च स्वपुत्रीं मिष्टान्नं भोजयित्वा हर्षेण स्वागतं कृतवन्तौ । एतस्मात् भाविछात्राः पुत्र्यः च प्रेरयिष्यन्ति। स्वस्य भविष्यस्य लक्ष्यस्य वर्णनं कुर्वन्ती सा अवदत् यत् तस्याः यात्रा अत्रैव न स्थगयिष्यति किन्तु सा विद्यावारिधिं (पी.एच्.डी.) कृत्वा संस्कृतक्षेत्रे अमूल्यं योगदानं दातुम् इच्छति।

अन्ते सः सर्वसहपाठिभ्यः, शिक्षकेभ्यः विशेषतया च संस्कृतभारती सङ्घटनाय धन्यवादं दत्तवती यत् परीक्षासु संस्कृतभाषायां लेखने वक्तुं चापि तस्याः साहाय्यं कृतवती। भविष्ये च संस्कृतभारत्या सह सङ्गतिं कृत्वा संस्कृतस्य प्रचारस्य इच्छां प्रकटितवती।




# संस्कृतभारत्याः देहरादूनस्य एकदिवसीयजनपदसंस्कृतसम्मेलनस्य आयोजनम्

नगरनिगम-टाउनहाल इत्यत्र संस्कृतभारत्याः देहरादूनस्य एकदिवसीयजनपदसंस्कृतसम्मेलनस्य आयोजनं सञ्जातं । सम्मेलने संस्कृतभाषायां निहिताः सर्वे ज्ञान-विज्ञान-कला-संस्कृतेः विषयाः चर्चिताः अभवन्। सम्मेलनस्य उद्घाटनं टपकेश्वरमहादेवमन्दिरस्य महन्तस्वामी कृष्णगिरी, आयुर्वेदविद्वान् डॉ. विनीशगुप्ता, पार्षदः विमलगौडः,



संस्कृतभारतीदेहरादूनस्य संरक्षकः डॉ. सूर्यमोहनभट्टः च दीपप्रज्ज्वलनेन अकुर्वन्। अस्मिन् अवसरे आर्षकन्यागुरुकुलस्य विद्वद्भिः आचार्यैः पौंधागुरुकुलस्य आचार्यैः च वेदपाठः कृतः । वक्तारः संस्कृतभाषायां निहितस्य ज्ञानपरम्परायाः विषये व्याख्यानं दत्तवन्तः, वक्तारः अवदन् यत् संस्कृतज्ञानपरम्परा भारतीयचिन्तनस्य पराकाष्ठा अस्ति। सम्मेलने संस्कृतभाषायाः प्रचारार्थं विचाराः प्रस्तुताः। सम्मेलने ज्ञानविज्ञानकलासंस्कृतिश्चचादीनां विशेषरूपेण चर्चा अभवत् ।

अस्मिन् अवसरे संस्कृतविज्ञानप्रदर्शनी अपि आयोजिता ।संस्कृतभाषायां निहितानां विज्ञानस्य मूलभूतसंकल्पनां विषये प्रदर्शनी आयोजिता। संस्कृतप्रदर्शन्यां गणितभूगोलखगोल-विज्ञानान्तरिक्षविज्ञानादिविषयेषु उत्तराखण्डराज्यविज्ञानस्य तथा प्रौद्योगिक्यनुसन्धानपरिषदः समन्वयेन प्रदर्शन्याः आयोजनं कृतं ।

तृतीयसत्रे भारतीयकलाप्रदर्शिता। अस्मिन् संस्कृतसत्रे भारतीयसंस्कृतेः परम्परायाश्च विषये प्रस्तुतिः कृता । प्रतिभागिनः भारतीयकलाधारितगीतानृत्य- नाटकादिशास्त्रीयकलाप्रदर्शितवन्तः ।

अस्मिन् सम्मेलने देहरादूनस्य विभिन्नसंस्थानां, विश्वविद्यालयानाम्, शोधसंस्थानां, विश्वविद्यालयानाम्, महाविद्यालयानाम् शैक्षणिकवैज्ञानिकसंशोधकाः भागं गृहीतवन्तः। सम्मेलनाय ४५० प्रतिनिधिभिः आवेदनं कृतम् आसीत्। सम्मेलने उत्तराखण्ड-संस्कृत-अकादमी, हरिद्वारद्वारा संस्कृतव्याख्यानमाला आयोजिता। अस्मिन् अवसरे वक्तारः अवदन् यत् संस्कृतेन भारतस्य गौरवं तस्य संस्कृतिः सभ्यता च संस्कृतिः मूलभूतः आधारः सर्वं संस्कृतम् एव। इयं भाषा वैज्ञानिकभाषा अस्ति। अन्यभाषाणां माता अस्ति। संस्कृतभाषा सर्वविधज्ञानस्य कोषः अस्ति । संस्कृतभाषायाः पठनीयं व्याकरणं सर्वत्र स्वीकृतम् अस्ति । न केवलं संस्कृतभाषायाः अपि तु अन्यभाषायाः अपि उपयोगी भवति । वक्तारः अवदन् यत् अनेकेषु देशेषु संस्कृतस्य उपयोगितायाः महत्त्वं दीयते। संस्कृतप्रदर्शने गणितं, ज्यामितिः, चिकित्साशास्त्रम्, आयुर्वेदः, पर्यावरणम्, संस्कृतिः, प्रबन्धनम् इत्यादीनां ज्ञानविज्ञानस्य प्रदर्शनी दर्शनीया आसीत् । राष्ट्रियैकतायाः संस्कृतेश्च दिव्यदृष्टिः प्रदात्री संस्कृतभाषा मानवसमाजस्य एकीकरणाय कार्यं करोति । संस्कृतेन भारतस्य गौरवं संस्कृतिः सभ्यता च।देहरादूने संस्कृतभारत्याः जनपदसम्मेलनं सम्पन्नं संस्कृतभाषायां निहितानां विज्ञानस्य मूलभूतसंकल्पनाविषये अभवत् प्रदर्शनी ।।1।। प्रतिभागिनः भारतीयकलाधारितगीतानृत्य-नाटकादिशास्त्रीयकलाप्रदर्शितवन्तः।।2।। शैक्षिकसंस्थासु संस्कृतम् अनिवार्यं कर्तुं च पदसृजनाय अभवत् चर्चा ।।3।। संस्कृतभाषायाः पठनीयं व्याकरणं सर्वत्र स्वीकृतम्।।4।। संस्कृतभाषा मानवसमाजस्य एकीकरणाय कार्यं करोति।।

अस्मिन् अवसरे वक्तारः अवदन् यत् संस्कृतेन भारतस्य गौरवं तस्य संस्कृतिः सभ्यता च संस्कृतिः मूलभूतः आधारः सर्वं संस्कृतम् एव। इयं भाषा वैज्ञानिकभाषा अस्ति। अन्यभाषाणां माता अस्ति। संस्कृतभाषा सर्वविधज्ञानस्य कोषः अस्ति । संस्कृतभाषायाः पठनीयं व्याकरणं सर्वत्र स्वीकृतम् अस्ति । न केवलं संस्कृतभाषायाः अपि तु अन्यभाषायाः अपि उपयोगी भवति । वक्तारः अवदन् यत् अनेकेषु देशेषु संस्कृतस्य उपयोगितायाः महत्त्वं दीयते। संस्कृतप्रदर्शने गणितं, ज्यामितिः, चिकित्साशास्त्रम्, आयुर्वेदः, पर्यावरणम्, संस्कृतिः, प्रबन्धनम् इत्यादीनां ज्ञानविज्ञानस्य प्रदर्शनी दर्शनीया आसीत् । राष्ट्रियैकतायाः संस्कृतेश्च दिव्यदृष्टिः प्रदात्री संस्कृतभाषा मानवसमाजस्य एकीकरणाय कार्यं करोति । सम्मेलने सर्वेषु विषयक्षेत्रेषु संस्कृतविषयं समावेशयितुं बलं दत्तम् भाषा, चिकित्सा, तकनीकी, विधिः, विज्ञानरूपेण शिक्षायां समावेशं कर्तुं केन्द्रीयविद्यालये च सीबीएसई इत्यत्र तथा च शैक्षणिकसंस्थानादिषु संस्कृतभाषायाः अध्यापनं अनिवार्यं कृत्वा संस्कृतविद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु, सर्वेषु शैक्षणिकसंस्थासु च तत्क्षणमेव संस्कृतपदानि निर्माय निर्मितपदेषु नियुक्तिं कर्तुं आग्रहः कृतः। सम्मेलने भागं गृहीत्वा संस्कृतगीते नृत्यमपि प्रस्तुतवन्तः । संस्कृतनाट्यस्य मञ्चनम् अपि अभवत् । अवसरेस्मिन् मुख्यशिक्षाधिकारी प्रदीपरावतः, वैज्ञानिकः डॉ. ओमप्रकाशः नौटियालः, वरिष्ठशल्यचिकित्सकः डॉ. माधवमैठाणी, संस्कृतप्राचार्यः डॉ. रामभूषणविजलवाणः, संस्कृतभारत्याः प्रांतीयसंगठनमंत्रीगौरव शास्त्री , पूर्वप्रान्तमन्त्री संजूप्रसादध्यानी, प्रदीपः सेमवालः, नागेन्द्रव्यासः इत्यादयः उपस्थिताः आसन्। डॉ. नवीनजसोला, श्री योगेश कुकरेती, नगरकोषाध्यक्षः, श्री माधवपौडेलः, डॉ. आनंदजोशी, डॉ. राजेशशर्मा, महेशः उनियालः , नीतू बलूनी, श्रीमती अनुराधा ध्यानी, डॉ. नीतू बलूनी, श्रीमती लक्ष्मी जोशी, सुश्री. शिवानीरमोला, श्रीमती ऋतुजसोला, श्रीमती वंदना सेमवालः, श्रीमती सीमा कुकरेती, श्रीमती रिंकी पौडेलः, श्रीमती शिवशर्मा, श्रीमती भुवनेश्वरी व्यासः, डॉ. पवनमिश्रः, श्री नीतीशमैठानी, श्री संकेतकौशिकः, श्री. धीरजबिष्टः, श्री विकासभट्टः, श्री अजयनौटियालः, डॉ. मोहितबडोनी, धीरजमैठाणी, श्री सौरभखण्डूरी आदयः उपस्थिताः आसन्।

# सम्पादकीयम्

सम्मानिताः सुजनाः!

सादरं नमोनमः।

सहर्षमिदमभिसूच्यते यदस्य संस्कृतसंवादस्य द्वादशवर्षाणि पूर्णानि। अयमंकः भवद्भ्यः सोल्लाससमर्प्यते। संस्कृतसंवादस्य इयं यात्रा ०१जुलाई २०११ इति खिष्टाब्दे आचार्यवर्याणां भवतां स्व.पद्मश्रीरमाकान्तशुक्लमहोदयानां कविवर्याणां प्रो. राधाबल्लभत्रिपाठिनां प्रेरणया प्रारब्धा आसीत्। मध्ये मध्ये महान् सहयोगो भवतामहर्निशमलभ्यत मयेति अस्य प्रकाशने इति संस्मरन्ती अतीवानन्दमनुभवामि। सुखस्य वार्ता इयमस्ति यदस्य पाठकाः देशे देशान्तरे विद्यमाना अनुदिनं संस्कृतभाषाया ध्वजमुत्तोलयन्ति। संस्कृतपत्रकारिताक्षेत्रे अस्य पाक्षिकपत्रस्य योगदानमविस्मरणीयमस्ति। देशस्य विदेशस्य मुख्यवार्ताः कवीनां कविता लेखकानां लेखा इति इमं संवादं समलंकुर्वन्ति। दशाब्दसम्पूर्त्यावसरे अहं भवतः सर्वान् गुरून् विदुषः सहयोगिनः प्रणमन्ती स्मरामि हृदि भावयामि च।

विजानन्ति भवन्तो यत् संस्कृतपत्रप्रकाशनमस्मिन् समये यद्यपि दुष्करं प्रतिभाति, किन्तु स्वल्पेन भवतां सौजन्येन एतत्कार्यं सुकरं भवति। विगतवर्षयोरस्य संस्कृतसंवादस्य पाठकानां संख्या भूयसी जाता, अहमभिलषामि यत् समयेनास्य प्रकाशनं शुद्धं सामयिकं सुरभारतीसमुन्नयनपरं धर्मानुरूपं भवेत्। अतो भवन्त एव प्रार्थये यदस्य सार्वत्रिकप्रसाराय सार्वभौमिकविकासाय सर्वजनसौलभ्याय च निरन्तरमस्मान् निस्सन्देहं प्रेरयन्तु। अहन्तु वाञ्छामि यदयं संवादः संस्कृतजगति महतीं ख्यातिं लभताम्, अनुपक्षं देशस्य सेवां कुरुतां चेति।

अन्ते भगवन्तं शिवं वन्दमाना अस्य संस्कृतसंवादस्य प्रचाराय प्रसाराय सहयोगाय च परमोपकारिणो भवतो नौमि।

अमरवाणी विजयताम्

भवदीया

सम्पादिका

## ॥ वेद वाणी ॥

‘अव द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः ।
अव राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम् ।।
न स स्वो दक्षो वरुण ध्रूतिः सा सुरा मन्युर्विभीदको अचित्तिः ।
अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता ।।’

'O! Lord Varuna! Redeem us from the adverse impact of sins, if any, committed by our forefathers. Similarly, pardon us for the sins committed by our own bodies in this birth and free us from the impact thereof. Just as one avoids a thief who gives grass to stolen cattle for satisfying it, keep the noble away from sin in the same way.““O! Lord Varuna! Our own strength, even if not originally inclined toward commission of sins, tends to go astray when obstacles crop up in the path of progress. Liquor,anger, temptation, gambling, ignorance, indiscretion and indifference to duty-all these push one toward committing of sins. Sometimes, the old influence the young to do wrong things.Sleep and lethargy also make one inclined toward falsehood and sinning. Let us be alert about all these pitfalls.'

The Rig Veda 7.86.5&6“

‘अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः ।
अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ।।
अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु ।
शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ।।’

'Making myself sinless, I bow down to Lord Varuna who nourishes His devotees, protects them and fulfills their legitimate aspirations. I serve the Supreme Lord as a faithful servant. He inspires and guides the ignorant in the right direction. He, particularly, prods the wise devotee who prays to Him, toward great riches and prosperity.““This prayer in praise of Lord Varuna who confers the wealth of food on His devotees, may yet remain the best in our hearts. May this strike a harmonic chord in You. May our well-being be rooted in auspiciousness. May our gains from labour also be based on an auspicious foundation. O! Lord Varuna! May You always protect us with auspicious means of well-being.'

The Rig Veda 7.86.7&8

‘पाकत्रा स्थन देवा हृत्सु जानीथ मर्त्यम् ।
उप द्वयुं चाद्वयुं च वसवः।।
आ शर्म पर्वतानामोतापां वृणीमहे ।
द्यावाक्षामारे अस्मद्रपस्कृतम्।।
ते नो भद्रेण शर्मणा युष्माकं नावा वसवः ।
अति विश्वानि दुरिता पिपर्तन ।।’

'“O! Adityas! You sustain and rule everyone. Know, within Your hearts,who are cunning and who are upright.And be with those who are pious and good.““We wish to have access to the joy and happiness inherent in mountains and waters. Heaven and Earth may keep us away from sin.““O! Vasus! You sustain all in this world. With the help of auspicious and comfortable vessel of Yours, guide everyone in completely crossing this ocean of evil deeds and calamities.’

The Rig Veda 8.18.15/16/17

**संकलन : एस.वासुदेव रावः**

# तत्त्वमसी–महावाक्यार्थविचारः



**–रामप्रिय शर्मा**

रामप्रिय शर्मा

(रामजयपालनगर, पटना)

जीवब्रह्मैक्यप्रतिपादनमेव सर्वासामुपनिषदां तात्पर्यमित्युक्तमद्वैतिविद्वद्भिः। ग्रन्थस्य प्रकरणस्य वा तात्पर्यनिर्णयार्थं मीमांसकैर्निर्धारितान्युपक्रमोपसंहारप्रभृतीनि षडल्लि किंङ्गान्यधिकृत्य शङ्करसुरेश्वरवाचस्पतिमिश्रादयो दार्शनिकाः तैर्लिङ्गैर्ब्रह्मात्मैक्यमेव वेदान्तवाक्यानां तात्पर्यमभ्युपगच्छन्ति। एतेषां विदुषां मतानुसारेण जीवस्य ब्रह्मणा सहाभेदत्वं विपश्चितां कृते पाणाविवामलकं सुस्पष्टमेव भवति सर्वासूपनिषत्सूपक्रमोपसंहारवाक्यैरभेदप्रतिपादनात्। अद्वैतमतसिद्ध्यर्थं कतिपयान्युदाहरणानि प्रस्तूयन्ते।यथा –ॐ आत्मा वा इदमेक एवाग्र आसीत। नान्यत्किञ्चन मिषत् [ऐतरेयोपनिषद् १/१/१] ।

इत्यारभ्य श्प्रज्ञानं ब्रह्म श[तत्रैव ३/१/३]इतिवाक्यपर्यन्तमात्मतत्त्वं व्याख्यातमस्ति।आत्मैव ब्रह्म इतीदमेव मतं तत्र निरूपितं भवति।सामवेदसम्बद्धायाः छान्दोग्योपनिषदःषष्ठोऽध्यायः‘ सदेव सोम्येदमग्र आसीत् [ छा०उ०६/२/१ ]’इति वाक्येनारभ्यते तत्त्वमसि [छा ०उ० ,६/१६]इति चोपसंह्रियते च(अध्यायस्यान्तिमे भागे श्रीमदाद्यशङ्कराचार्यमहाभागैर्निष्कर्षत्वेनोदीर्यते–‘तस्माद्विकारानृताधिकृतजीवात्म –विज्ञाननिवर्तकमेवेदं वाक्यं तत्त्वमसीति सिद्धमिति ,६/१६/३श्श्इत्थं सर्ववेदान्तवाक्यानां मौलिभूततत्त्वमभेदप्रतिपादनमेवेति निगदितमद्वैतिविद्वद्भिः।

छान्दोग्योपनिषदः षष्ठाध्याये सद्विद्याप्रकरणे तत्त्वमसीति वाक्यमाम्नातम् । द्वादशवर्षपर्यन्तं सर्वान्वेदानधीत्य प्रत्यागतमनूचानमानिनं पुत्रं श्वेतकेतुं प्रति तत्त्वज्ञानमुपदिशति महर्षिरारुणिः।पितापुत्रयोः संवादोऽयमात्मविद्यायाः सारिष्ठत्वप्रदर्शनार्थमारभ्यते।

सम्वादेऽस्मिन्श्सदेव सोम्येदमग्र आसीत् ‘इत्युपक्रमवाक्येन नामरूपव्याकरणात्प्राक् जगदिदं सद्रूपेण अर्थाद् ब्रह्मरूपेणैव विद्यमानं भवतीति निरूपितम्। सृष्टिपूर्वं जगतोऽस्य सत्तामत्र प्रतिषिध्य तस्यैवास्तित्वं कारणत्वेनोद्घोषितं भवति। यथा निर्माणात्प्राङ् मृत्तिकाविनिर्मितानि नानानामरूपसंयुक्तानि भाजनानि मृत्तिकारूपेण भवन्ति तथैव जगतः प्रागुत्पत्तेः निखिलप्रपञ्चोऽयं सर्वगतमेकं निरञ्जनं निरवयवं निर्विशेषं ब्रह्म एवासीदित्यभिप्रायः।

सदितिशब्दो ऽत्र किञ्चित् व्याख्यायते।सत् सत्यपर्यायः। त्रिषु कालेषु यस्य स्वरूपं निश्चलं निर्विकारञ्च भवति तदेव सत्यम्।

यदस्त्यादौ,यदस्त्यादौ,यन्मध्ये स्वयमेव प्रतिभाति च, तदेव सत्–सत्यमिति वेदान्तडिण्डिमे निरूपितम्। सृष्ट्यादाववसाने च केवलं ब्रह्मैव वर्तते,मध्ये [सृष्टेःप्रलयस्य च मध्यावस्थायां]भ्रमवशात् (ब्रह्मणि ) विश्वं तादृशमेव प्रतीयते यादृशं रज्ज्वादावधिष्ठाने सर्पादयः पदार्थाः (अयथार्थेषु सत्स्वपि)दृश्यन्ते।अधिष्ठानभूतानां रज्ज्वादिपदार्थानां किरणक्षेपकत्वात् साधनान्तरत्वाद्वा साक्षात्कारे सति सर्परजतादयोऽध्यस्ताःपदार्थाः स्वयमेव निवर्तन्ते,केवलमधिष्ठानमेवावशिष्यते च।एवम्प्रकारेण यदा ज्ञानेन सर्वनुगतं सत्तत्त्वं ब्रह्मरूपमधिष्ठानं साक्षात्क्रियते सकलप्रपञ्चो निवर्तते।

सदेव सोम्येदमग्र आसीदित्यत्र निखिलप्रपञ्चो व्यावर्त्यत एकमेवाद्वितीयमित्यनेन प्रयोगेण ब्रह्मण एव सत्यत्वं तद्व्यतिरिक्तवस्तुनो मिथ्यात्वञ्च प्रतिपादितम्।अत्र सहकारिकारणरूपस्य अन्यस्य पदार्थस्य सत्ता प्रतिषिध्यते।

नन्वासीदितिलङ्लकारप्रयोगेणेदानीमिदं न सदिति ज्ञायते।मैवम्,जगदधिष्ठानरूपस्य ब्रह्मण एव प्रपञ्चरूपेणावभासमानत्वात्।यथा रज्ज्वादाध्यस्तसर्पादिः रज्ज्वादिरेव घटशरावादीनि मृत्पात्रणि च मृदेव सन्ति ,तथैव नानानामरूपात्मकं सर्वमिदं जगत् वस्तुतस्तु ब्रह्मणो व्यतिरिक्तं किञ्चिदपि न विद्यत इतीदमेव मतं प्रतिपादयन्ती भगवती श्रुतिरभिधत्ते सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चनेति।

‘स आत्मा तत्त्वमसि श्वेतकेतो [छा०उ०६/८/७] इत्युपसंहारवाक्येऽस्मिन् आत्मज्ञानेन शोकमोहानर्थजालैस्संवलितस्यात्मजस्याविद्याजवनिकामपसारयति पिता। त्वंपदवाच्योऽयं श्वेतकेतुः अविद्यावशादात्मानं शरीररूपेण मन्यमानोऽहं पुत्ररुद्दालकस्यश सुख्यहम्’, ‘पण्डितोऽहम्’ इत्येवमवधार्य चतुरशीतिलक्षयोनिषु भ्रमणशीलो जीवः।

तस्य मोहनिवृत्त्यर्थमात्मज्ञानमुपदिश्यते परमकारुणिकेनोद्दालकेन पित्रा ।त्वं नासि संसार्यमुष्यशोकमोहादिधर्मवान्, प्रत्युत यत्सत्तत्त्वमुदीरितं मया तुभ्यं तदेवासि त्वमिति पित्रा प्रतिबोधिते सत्येव मोहपिधानान्मोक्षितः श्वेतकेतुरहं ब्रह्मास्मीत्येवमात्मानं विज्ञायामृतत्वमुपसम्पद्यते।।

छान्दोग्योपनिषदः षष्ठाध्यायेऽष्टमखण्डादारभ्य षोडशखण्डपर्यन्तं शाकुनिमधुकरनदीवृक्षान्यग्रोधलवणानीता–भिनद्धाक्षप्रभृतिभिर्दृष्टान्तैस्तत्त्वमसीतिवाक्यस्य भूयिष्ठप्रतिपादनात् जीवब्रह्मैक्यलक्षणतात्पर्यमभ्युपगन्तव्यम्।

# भोदीप! सुस्थिरोभव



राष्ट्रपति–सम्मानितः

**प्रो. वैद्यः बनवारीलालगौडः**

पूर्व–कुलपतिः

उत्सवप्रधानो हीयं देशो भारतवर्षः । नियताह्लादजनकव्यापारो ह्युत्सवः, उत्सवे हि हर्षस्यानन्दस्यामोदस्य प्रमोदस्य चावसरः मिलति । उत्सवस्तु क्षणोति दुःखम् अस्मात्कारणात् क्षण इति नाम्नापि ज्ञायते. वस्तुतस्त्वेष उत्सुवति प्रेरयति अत एव उत्सव इति नाम्ना सञ्ज्ञितः ।

शरीरंपञ्चमहाभूतविकारात्मकमात्मनोभोगायतनम्, अत्र हीन्द्रियाणिचक्षुरादीनि, सत्त्वं, ज्ञानप्रतिसन्धाताआत्मा च तिष्ठन्ति, शरीरे ह्येतेषांसम्यगदृष्टयन्त्रितो योगोऽस्ति। इन्द्रियाणिसत्त्वम्आत्माचेदंभौतिकंशरीरमाश्रित्यतिष्ठन्त्यन्तः भागे। आत्मात्वत्रनिर्विकारत्वेनतिष्ठति । शरीरे त्वात्माचेतयितापरंनतुसाक्षात्क्रियावान्। आत्माधिष्ठितस्यैवमनसः क्रियाउपचारादात्मनः क्रियेत्युच्यते। चेतनेनह्यात्मनाऽधिष्ठितंमनः क्रियासुप्रवर्तते, चेतनानधिष्ठितंतुमनःक्रियासुनप्रवर्तते । किन्त्वेतन्मनस्तु चञ्चलमस्त्यत एव शीघ्रमेव रागद्वेषादिभिर्युज्यते ।

शरीरे दोषात्मकाः वातपित्तकफाः विकृतिकारका भवन्ति, शरीरविकारास्तु ज्वरादयः सन्ति । मनसि तु रजश्चतमएवचमानसोदोषसङ्ग्रहः । तयोर्विकाराः कामक्रोधलोभमो–हेर्ष्यामानमदशोकचित्तोद्वेगभयहर्षादयः।

वर्तमानकाले हि जनाः मदेन (राजमद–धनमद–वयोमदेत्यादिभिः) ग्रस्ताः, अनुकूलशिक्षाप्राप्त्यर्थं प्रवेशपरीक्षाध्ययने व्यस्ताः, प्रतियोगिपरीक्षासु दत्तचित्ताः, शिक्षासमाप्त्यनन्तरं कार्यहीनत्वेन त्रस्ताः, ततः पारिवारिकजीवने स्रस्ताः,केचित् स्वव्यवसायेऽन्यसेवायां नियुक्ताः वा जनाः कार्यस्थलेऽपि नियतकार्यतः विरक्ताः निरताः वा चलदूरभाषयन्त्रमाध्यमेनान्तर्जालात् सम्प्राप्तं ज्ञानमितस्ततः प्रेषणेऽस्तव्यस्ताः, प्रदूषिते पर्यावरणेऽभ्यस्ताः, संयुक्तपरिवारप्रणालीतः दूरे न्यस्तास्तथा केचिज्ज्ञानलवदुर्विदग्धाः सर्व एव जनाःकामक्रोधलोभमोहादिभिर्मनोविकारैर्ग्रस्ताः भवन्ति, विशेषेण त्ववसादोऽतिक्रियत्वं वा दृश्यते युवजनेषु, तत्प्रभावप्रभावितास्तु ते आत्महत्यां कुर्वन्ति परहत्यां वा कुर्वन्ति । अथवा विभिन्नैर्मनोविकारैर्ग्रस्तास्तेकामक्रोध लोभमोहेर्ष्यादिभिराविष्टाः किमप्यकार्यं कुर्वन्ति ।

मानसविकाराणाम्प्रतिभैषज्यं तुत्रिवर्गस्यान्ववेक्षणं प्रमुखरूपेण निर्दिष्टम्। क्रमेऽस्मेन्नाचार्यश्चरकः कथयति यत्–तत्रबुद्धिमतामानसव्याधिपरीतेनापिसताबुद्ध्याहिताहितमवेक्ष्यावेक्ष्य–

धर्मार्थकामानामहितानामनुपसेवनेहितानां चोपसेवनेप्रयतितव्यं, नह्यन्तरेणलोकेत्रयमेतन्मानसंकि- ञ्चिन्निष्पद्यतेसुखंवादुःखंवा । (च. सू.11/46)धर्मार्थकामानां हितानामुपसेवनेमन्त्रौषधिमणिम–ङ्गलबल्युपहारहोमनियमप्रायश्चि- त्तोपवासस्वस्त्ययन–प्रणिपातदेवार्चनादीनां वैशिष्ट्यं वर्तते ।

मानसविकाराणामपवारणे निवारणे च मानसोज्ञानविज्ञानधैर्यस्मृ–तिसमाधीत्यादीनां महत्प्रभावो वर्तते। ज्ञानम् अध्यात्मज्ञानरूपेण ज्ञायते,विज्ञानंशास्त्रज्ञानं तथाधैर्यम्अनुन्नतिश्चेतस इति ज्ञायेते (धैर्यंविपद्यपिमनसोऽदैन्यम्), स्मृतिस्त्वनुभूतार्थस्मरणं भवति, विषयेभ्योनिवर्त्यात्मनिमनसोनियमनम्इति विशिष्टक्रियात्मकस्तु समाधिः। समाधिव्यतिरिक्तानामन्येषां संसिद्धिस्तु येन केनापि माध्यमेन समुत्पन्नेन हर्षेण जायते,प्रीतिस्तोषमात्रं, हर्षस्तुप्रीतिविशेषोऽस्ति।

अग्निंजरणशक्त्यापरीक्षेत, बलंव्यायामशक्त्यापरीक्षेत, श्रोत्रादीनिशब्दाद्यर्थग्रहणेनपरीक्षेत, एवमेव हर्षमामोदेनपरीक्षेत। उत्सवे त्वामोदो भवत्येव, हर्षस्योत्पत्तिस्तूत्सवेन जायते। अतएव जीवने उत्सवास्त्वपरिहार्याः।

मुदितं हि मनः यदाशब्दादिभिरनुकूलैर्हितकारकैर्विषयैः सहसंयुक्तं भवतितदातेष्वपिप्रीतिमद्भवति, नन्वनुकूलेषुविषयेषुस्वभावादेवप्रीतिर्भवति प्रीतश्च जनःसुखाकाङ्क्षीसन्पुनस्तेषु मनःसंयुज्यतेद्य उत्सवेन तु सर्वदा प्रीतेरभिवर्धनं भवति,यतो ह्युत्सवस्त्वौत्सुक्यंविषयाभिलाषइतियावत्,

शेषभागःपंचमपुटे

# यज्ञविद्या एवं विज्ञानविद्या-



-सुनील कुमार शर्मा
(लिपिविशेषज्ञ) दार्शनिक
इतिहासकार एवं पुरातत्वविद

स्वर्गीय पण्डित-श्रीमधुसूदन-माहाभागानां शेमुषो विलासानुसारं वेदग्रंथानुकूलं च "अग्नौसोमाहुतिर्यज्ञः" इति प्रतिपादकं भवति। तेषाम् अयम् अस्ति आत्रायः यत् प्राकृतिज्ञे अग्नीषोमीये सौर- सबरबरे यज्ञे चन्द्रमाः ग्र (शन-याः 93191912), अग्निः होता (गो० पू० २४), वायुः अध्वर्युः 6 गो० ५० ११३), आदित्यः उद्गाता (गो०२०२२४) एप संवत्सरः प्रजापतिः यजमानः अस्ति (शत०, ११1३७132)। मनःप्राण वाङ्मय सूर्यनिर्मित - मनुष्य- यजमानस्य आत्मा अपि मनःप्राण वाङ्मयः भवति । अस्य मनुष्यस्य मनः प्रणवाचः पृथिवी संवत्सरेण बद्धाः भवन्ति पृथिवीलोके मानवस्य जन्म ग्रहणात्। पृथिव्याकृष्टस्य मनुष्यस्य मनःप्राण वाङ्मयम् आत्मानं सौर-संवत्सरभज्ञ- प्रजापतेः मनःपूणवाभिः सह सङ्क्रामय्य मानसम् आत्मानं पार्थिवाकर्षाद् उन्मोच्च तस्य आत्मनः दिव्यलोक सङ्क्रामनम् एव यशस्थ प्रधान प्रयोजन भवति यज्ञ-यागयोः एकरूपता यागः च। साधारणः बाह्य-सम्बन्ध 'योग' कथ्यते, अन्तःसम्बन्धः च 'भाग' द्रीत अभिधीयते । शरीरेण सह वस्तूनां सम्बन्ध, 'योग', किन्तु शरीराग्नि उदराकृतस्प अन्वस्थ सम्बन्धः भागः भवति, अर्थात् यो : विजातीय-वस्तुनो, रासायनिकः सम्बन्धः याग- शब्देन निगद्यते। अस्थिर रासायनिक-सम्बन्धे पूर्वरूपस्य विलयनं भवति, अपूर्वरूपस्थ उदयः जायते । अयम् एव भाग-सम्बन्धः वैदिक परिभाषायां यज्ञ - शब्दस्य कथयितुं शक्यते ।

यज्ञविद्या एवं विज्ञानविद्या - सृष्टेः प्रत्येक वस्तु यज्ञनये वर्तसे (शत. क्र. ४/४/। इयं यज्ञविधा एवं अस्था के प्राचीना विज्ञान-विधी अक्षित द्य येषां मौलिक-तत्त्वानां समन्वयेन यज्ञ-स्वरूपस्य निष्पतिः भवति, जद् एवं तत्त्वं वैदिक विज्ञान - परिभाषानुसारे 'ब्रह्मा' इति वक्तुं शक्यते। अयम् एवं यज्ञः ब्रश प्रतिष्ठा । अतः एवं यज्ञः इति कथ्यते। आधुनिक-परिभाषायां यज्ञविद्या केमेस्ट्रीशशब्दव बहुच फिजिक्स- शब्दव व्यवहर्तुं शक्यते।

इमे यज्ञाः आधिदैविव्याधि भौतिकाध्यात्मिका लिख्यतु अपि सृष्टिषु सततं भवंति-इदम् एव प्राकृतिक यज्ञ-प्रक्रियानुसार आधारीकृत्यसाक्षात्कृत धर्म-महर्षयः दर्शपूर्णमासादि विभिन्नान् यज्ञान् अविश्चक्रुः एषां यज्ञानां भिन्नाताया निदाने सा एव प्राकृतिकी यज्ञविद्या निहिता अस्ति।

प्रथमपुटस्य शेषभागः

# भोदीप! सुस्थिरोभव

आमोदस्तुहर्ष एवद्य हर्षस्तु सत्त्वमूर्जयति (ऊर्जयतीतिमनोबलंकरोति), तेन हि मनोविकाराणामवसादादीनामपवारणं निवारणञ्च भवति । अत एव ये धार्मिकाः सन्ति ते तु तद्दृष्ट्या विभिन्नानानामुत्सवाना-मायोजनङ्कुर्वन्ति ।

ये तु नास्तिकाः सन्ति तेष्वप्युत्सवेन सत्त्वोर्जनं तु भवत्येव, अत एवोत्सवेषु तु सर्वएवोत्साहेन सम्मिलिता भवन्ति । यथा ग्रहाम्बुदरजोथूमनीहारैः समावृतमर्कमण्डलमवसन्नं भवति तथैव कामक्रोधलोभमोहेर्ष्यामानमदशोकचित्तोद्वेगभयहर्षादिभिः सत्त्वमवसीदति ।उत्सवो हि सत्त्वं प्रेरयति तत्र चानायासेनैवआनृशंस्यसंविभाग-रुचितातितिक्षासत्यधर्मधृत्यादीनां किञ्चिन्मात्रन्त्वभिवृद्धिर्भवत्येव। आनृशंस्यम्अक्रूरकर्मकारित्वरूपेण ज्ञायते। संविभागरुचिता तुसंविभज्यभोक्तुमभिलाषुकतां जानीयात्। तितिक्षाक्षमारूपेण ख्याता। अत्र तु सत्यमिति पदेनभूतहितंतथ्यंवचोवा गृह्णीयात्। धर्मोऽप्यत्र विशिष्टेऽर्थे प्रतिष्ठितः तद्धिकायवाङ्मनोभिःसुचरितम्।

भारतीयोत्सवेषु सामान्यतया सर्वेष्वेव धर्मस्य सम्पृक्तता भवत्येवतथा च केषुचिदुत्सवेषुहोमनियमप्रायश्चित्तोपवासस्वस्त्ययन-प्रणिपातदेवार्चनादीनामपि च नियतता भवति । तेन हि मनसः संशुद्धिर्भवति सद्विचाराणाञ्चावेशस्तत्र जायते। अत एव धर्मपरायणे जने आनृशंस्यादीनामभिवृद्धिर्विशेषेण भवति। दीपावलिमहोत्सवेन तु धनदेव्याः लक्ष्म्याः सम्बद्धता वर्तते, शरीरयापनार्थन्तु धनमेव प्राथमिकरूपेण पर्येष्टव्यं भवति, आचर्यश्चरकः कथयति यत्-

प्राणेभ्योह्यनन्तरंधनमेवपर्येष्टव्यंभवति ; नह्यतःपापात्पापीयोऽस्तियदनु-पकरणस्यदीर्घमायुः, तस्मादुपकरणानिपर्येष्टुंयतेत। तत्रोपकरणोपायाननु-व्याख्यास्यामः; तद्यथा-कृषिपाशुपाल्यवाणिज्यराजोपसेवादीनि, यानिचान्यान्यपिसतामविगर्हितानिकर्माणिवृत्तिपुष्टिकराणिविद्यात्तान्यारभेतकर्तुं; तथाकुर्वन्दीर्घजीवितंजीवत्यनवमतःपुरुषोभवति। (च.सू.11/5)

अत्र हि पापशब्देनपापकार्यदुःखमुच्यत। उपकरणन्त्वारोग्यभोगधर्म-साधनीभूतोधनप्रपञ्चः, अत एव शरीरपरिपालनाय धनन्तु परमावश्यकम्, तदर्थं हि दीपोत्सवः । दीपोत्सवे यथा शुद्धः स्थिरः प्रसन्नार्चिर्दीपो दीपाशये भाति तथैव तेनोत्सवेन समुत्पन्नेनामोदात्मकेन हर्षेणोर्जितममलं सत्त्वमात्मनि संवृतायने ज्वलति। स्वास्थ्यसंरक्षणार्थं तन्मूलकस्य धनस्य प्राप्त्यर्थं धनस्याधिष्ठात्र्या लक्ष्याः प्रीत्यर्थं दीपं प्रज्वालयन् वयं सर्वदा नुमः निवेदयामश्च यत् -"भोदीप ! सुस्थिरोभव" ।

# द्वैतवेदान्तदर्शने ईश्वरस्य स्वरूपम्

## (प्राथमिकपरिचयप्रदायकःलघुनिबन्धः)



**प्रो. चौडूरि उपेन्द्र रावः**
वरिष्ठाचार्यः,
संस्कृत-प्राच्यविद्यासंस्थानम
जवाहरलाल नेहरू विश्वविद्यालयः
नवदिल्ली ११००६७

**वैदिकसाहित्ये ईश्वरविचारः**

समग्रे भारतीयवाङ्मये ईश्वरतत्त्वविवेचनं दृश्यते।अस्माकं भारतीयदार्शनिकसाहित्ये ईश्वरविचाराय सर्वाधिकं महत्वं प्रदत्तम् । विशेषतः, भारतीयदार्शनिकसाहित्ये ईश्वरमुद्दिश्यैव विविधपक्षाः प्रस्तुताः, यतो हि कोऽस्य जगतः कर्ता? इत्येतस्मिन्नेव विषये अस्माकं पूर्वर्षिणां प्रदानसमस्याऽसीत् । वेदेषु तु परमेश्वरस्य अस्तित्वविषयिणी चर्चा विस्तृतरूपेण कृता। प्राचीने 'यजुर्वेदे उक्तं यत्' खं ब्रह्म' इति। अर्थात् आकाशवत् व्यापकः ओमेव ब्रह्म इति। ततस्तत्रैव प्रतिपादितं यत् ख्र 'ओ३म् क्रतो स्मर. ....' इत्यादि, अर्थात् 'ओ३म्' रूपे स्थितस्य यज्ञमयस्य भगवतः स्मरणं कुरु इत्यर्थः। उपनिषत्स्वपि ईश्वरस्य स्वरूप-स्वभावयोर्विषये विपुला चर्चा कृता। तथा च 'कठोपनिषदि' उक्तं यत् - "सर्वेषु वेदेषु यस्य परमात्मनः स्वरूपं वर्णितं, समग्रमपि तपः यस्य प्राप्तेः साधनभूतं प्रतिपादितं, तस्य परमेश्वरस्य नाम 'ओ३म्' इति ।"सर्वे वेदा यत् पदमामनन्ति.... ब्रवीम्योमित्येतत्, तदेवाक्षरं ब्रह्म इत्यादि"। 'प्रश्नोपनिषदि' उक्तं यत्-"एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः' 'माण्डूक्योपनिषदि' उक्तं यत्- 'ओ३म् इति एतद् अक्षरमिदं सर्वं.........सर्वमोङ्कारमेव'।



तैत्तिरीयोपनिषदि उक्तं यत् ख्र 'ओमिति ब्रह्म। ओमितीदं सर्वम्'। तत्रैव उक्तं यत्- 'ओमिति सामानि गायन्ति' मुण्डकोपनिषादि विषयोऽयमालंकारिकरूपेण प्रतिपादितः तद्यथा, "प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते"। 'भगवद्गीतायां अयमेव विषयः प्रतिपादितः, "ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्। यः प्रयाति त्यजन्देहं स याति परमां गतिम्" इति। (भगवद्गीता ८/१३)

ङ्कार एव परं ब्रह्म। अत एव सर्वेपि वैदिकाः मन्त्राः ङ्कारेण प्रारभ्यन्तेI

**ब्रह्मणः सगुण-निर्गुणरूपेः**

वैदिकवाङ्मये ब्रह्मणः सगुणं निर्गुणं चेति रूपद्वयं प्राप्यते । निर्विशेषब्रह्म एव निर्गुणब्रह्म इत्युच्यते। तस्मिन् गुणसन्निवेशः न शक्यते। तद्ब्रह्म निर्विशेषं यतो हि केनापि विशेषेण संयुक्तं न भवति । केनापि चिह्नेन तत् चह्नितं न भवति। अपि च तत्केनापि प्रकारेण निर्दिष्टं न भवति। लोके सर्वेषामपि वस्तूनां गुणाः भवन्ति, परन्तु निर्गुणत्वाद्ब्रह्म निर्गुणमित्युच्यते।

'वृहदारण्यकोपनिषदि' गार्गीं प्रति ब्रह्म स्वरूपवर्णनं कुर्वन् याज्ञवल्क्यः वदति यत्-'तदक्षरं ब्रह्म न स्थूलं न अणु, न ह्रस्वं न दीर्घं न स्निग्धं न छायात्मकं न अन्धकारात्मकं न वायु, न आकाशः, रसगन्धविहीनश्च इति। अत एव तत् चक्षुणा न दृश्यते, श्रोतेण मनसा वाण्या च नावगम्यते । तन्नान्तर्विद्यते, न च बाह्ये, तन्न भक्ष्यं, न वा भक्ष्यते । परन्तु, अन्यत्र वैदिकवाङ्मये ब्रह्मणः सगुण-सविशेषरूपमपि प्रतिपादितम् । यजुर्वेदे उक्तं यत्-'अतो धर्मान्धारयत् !' अर्थाद्ब्रह्म धर्मान्, अर्थात् गुणान् धारयति। 'तैत्तिरीयोपनिषदि' उक्तं यत्-'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति!' अर्थात् यस्मात् सर्वे प्राणिनः, सर्वाणि भूतानि च उत्पन्नानि भवन्ति, यस्य अन्ते प्रविशन्ति, तत् ज्ञातुं प्रयत्नं कुरु, तदेव ब्रह्म इति । कारणगुणाः कार्यगुणान् अनुसरन्ति इति न्यायेन यदि कारणस्वरूपे ब्रह्मणि न भवन्ति गुणाः, तर्हि कार्यस्वरूपायां प्रकृतावपि ते गुणाः न सम्भवन्ति ।

**ईश्वरविषयेद्वैतमतम्ः**

द्वैतदर्शनस्यद्रष्टारःभवन्तिप्रातस्मरणीयाःगुरवः मध्वाचार्यस्वामिपादाः। द्वैतदर्शने ईश्वरः सर्वतन्त्रस्वतन्त्ररूपेन वर्णितः। संसारेईश्वरः एक एव स्वतन्त्रः, जीवादयःअन्येसर्वेऽपिपरतन्त्राः,अर्थात्स्वतन्त्राश्रिताः। अनेनप्रकारेणमध्वाचार्याणांसिद्धान्तोऽयंभवतियत्-जीवः प्रकृतिः च स्वतन्त्रस्य परब्रह्मणःअधीनभूतेभवतः, अथवातदाश्रितेभवतःइति।एवंस्वतन्त्रभूतेपरब्रह्मणि-समाश्रितस्सन्नपिजीवःमोहाज्ञानादिवशात्दुखितोभवति।

**वैष्णवमतेब्रह्मणःस्वरूपम्ः**

प्रायः सर्वेऽपि आचार्याः वैष्णवसम्प्रदाये ब्रह्मणः स्वरूपं सगुणं सविशेषं च स्वीकृतवन्तः। यद्यपि वैष्णवसम्प्रदायेषु ब्रह्मणः साकारविग्रहमुपदिश्य मतभेदः दृश्यते, तथापि तत्र ब्रह्मणः सगुणोपासना एव अधिका। केचन वैष्णवसम्प्रदाये परमात्मनः निर्गुणरूपं स्वीकुर्वन्तोपि तस्मिन् सगुणत्वरूपसाधने प्रयासरताः! एतादृशेषु बारकरी, रामदासी सम्प्रदायाः प्रधानाः । परन्तु वैष्णवसम्प्रदाये चत्वारः प्रमुखवैष्णवसम्प्रदायाःभवन्ति।

1. श्री वैष्णवसम्प्रदायः (रामानुजाचार्यस्य सम्प्रदायः)
2. सनकसम्प्रदायः (निम्बार्कस्य सम्प्रदायः)
3. ब्रह्मसम्प्रदायः (मध्वाचार्याणां सम्प्रदायः)
4. रुद्रसम्प्रदायः (वल्लभसम्प्रदायः)

अन्येपि वैष्णवसम्प्रदायाः यथा गौडीयवैष्णवसम्प्रदायः इत्यादयः विलसन्ति, तेषु सर्वेषु सम्प्रदायेषु ईश्वरस्य सगुणत्वं मुक्तकण्ठेन स्वीकृतम्। एते स्वसिद्धान्तस्य प्रतिष्ठापनार्थं उपनिषद्-ब्रह्मसूत्र-गीतादिग्रन्थान्समाश्रितवन्तः।

**मध्वसम्प्रदाये ईश्वरस्य स्वरूपम्ः**

सर्वेषु वैष्णवसम्प्रदायेषु मध्वसम्प्रदायः स्वीयेन उत्कृष्टेन वैशिष्ट्येण शोभते । अत्र अद्वैत-विशिष्टाद्वैतादि-मतानां निरसनपूर्वकं द्वैतमतं सुप्रतिष्ठापितम्। अस्य हि मतस्य उद्भावकाः मध्वाचार्याः ईश्वरं जगत्कारणभूतमेकं स्वतन्त्रं तत्त्वं संवर्णितवन्तः। ईश्वर एव सर्वतन्त्र-स्वतन्त्रः, अन्यानि सर्वाणि तत्त्वानि तदाधारितानि एवभवन्ति, अर्थात्परतन्त्राणि भवन्ति। अतएवोक्तं,

**"स्वतन्त्रं परतन्त्रं च द्विविधं तत्त्वमिष्यते।**
**स्वतन्त्रो भगवान्विष्णुः निर्दोषोऽशेषसद्गुणः।।" इति।**

(मूलग्रन्थः-तत्त्वविवेकः; सर्वदर्शनसङ्ग्रहस्यपूर्णप्रज्ञदर्शनम्पृ. सं. २३३)
,

अस्मिन् मते प्रतिपादितम् यत् परमात्मा एक एव स्वतन्त्रः, अनन्तगुणगणान्वितः विष्णुस्वरूपः। अनन्तगणविभूषिततत्त्वमेव परमात्मनः लक्षणम्। जगत्सृष्ट्याः कारणभूतोभवतिपरमेश्वरः, अर्थात् जगतः उत्पत्तिः, स्थितिः, संहारः, नियतिज्ञानावृत्तिः, बन्धः, मोक्षः इत्यादिनां समस्तानां निमित्तभूतं एकमेव परं ब्रह्म।

मध्वाचार्याणां मतानुसारेण तत्वस्य द्विविधं तत्वमिष्यते। "यत्तत्वं स्वस्वरूपंप्रकृत्यादीनामन्यतत्त्वानामपेक्षाविरहितं तदेव स्वतन्त्रं, तद्विपरीतं तत्त्वमर्थात् यत्स्वरूपं प्रकृत्यादीनां भवति, तत् भवति अस्वतन्त्रं तत्त्वम् । अन्यदर्शनेष्विवात्रईश्वरःजगदुपादानकारणत्वेन न स्वीक्रियते। मध्वाचार्यैः उक्तंयत्, ईश्वरः, जीवः, प्रकृतिः एतानि त्रीणि भिन्नतत्वानि भवन्ति। एतेषुप्रकृतिरेवजगदुपादानकारणंभवति। उपनिषत्सुप्रतिपादितंयत्ब्रह्मजगतः उपादानकारणंभवतिइति, परन्तुमध्वसिद्धान्तानुसारेणप्रकृतिरेवजगदुपादानकरणम्। साप्रकृतिःपरतन्त्राइतिकृत्वास्वतन्त्रस्यब्रह्मणःअर्थाद्विष्णोः- उपर्येवसमा-श्रिताभवति।ईश्वरःजगत्कारणभूतः, परन्तुजगत्कारणत्वंतस्यन- विकारित्वेन, किन्तुपितृवदेवेतिआचार्यैः प्रतिपादितम्। जगत्कारणत्वंचब्रह्मणोनविकारित्वेन, किन्तुपितृवदेवेतिश्रुत्यादर्शय- न्त्याचार्याः। अर्थात्ब्रह्मणःविकारस्वरूप-कत्वेनजगत्कारणत्वंनभवति, परन्तुपितृस्वरूपेणैवजगत्कारणत्वंस्वीक्रियते, श्रुतिप्रतिपादितत्त्वात् ।

इयंप्रकृतिःपरमात्मनःशरीरंभवति, अतएवपरमात्मनः इच्छायाःप्रभावः प्रकृतौदृश्यते। परमात्मनःशरीरंतावन्नित्यं, कल्याणमानन्दमयम्। "ज्ञानानन्दात्मककल्याणविग्रहवान्"- (पदार्थसंग्रहः, परमात्मप्रकरणम्)। पदार्थसंग्रहेतावदुक्तं, "तत्रपरमात्माअनन्तगुणपरिपूर्णः, सृष्ट्याद्यष्टकर्ता, सर्वज्ञः, परममुख्ययावृत्त्यासकलशब्दवाच्यः, जडजीवप्रकृतिभ्योऽत्यन्तविलक्षणः, ज्ञानानन्दात्मककल्याणविग्रहवान्, सर्व-स्वतन्त्रः, एकएव, नानारूपः, सर्वाण्यपिरूपाणिपूर्णानि, स्वरूपगुणावयव-क्रियादिभिरत्यन्ताभिन्नः"।

रामानुजादि-विभिन्न-वैष्णवसम्प्रदायेषुप्रतिपादितरूपेण मध्वाचार्यैःईश्वरस्यअनन्तगुणाविभूषितत्त्वंस्वीकृतमेव ।मध्वाचार्यैःअन्यवैष्णवाचार्यैरिवउपनिषत्प्रयुक्तएवनिर्गुणशब्दः प्रयुक्तः, अतोउपनिषत्सम्मतमेतदितिज्ञातव्यम्। वस्तुतः, निर्गुण-शब्दस्यार्थः गुणाभावोनभवति- अपितुकेवल-ध्येयगुणाभावमात्राः, येहिगुणाःप्रकृतौसत्व-रजस्तमोगुणाःभवन्ति, तादृशैर्गुणैःविरहितःईश्वरःपरन्तुसर्वथागुणाभावरूपइति न। मध्वाचार्यैः प्रतिपादितं यत्१. ईश्वरः२. जगत्, ३. आत्माइत्येतानित्रीण्यपितत्त्वानिअनादिकालादेवावस्थितानि। अपि च अनन्तकालपर्यन्तमप्येतानिस्थास्यन्त्येव।

मौलिकतयाएतानित्रीणितत्त्वानिपरस्परभिन्नानि, अन्यानिचपृथक्भूतानि । एतादृशस्यसिद्धान्तस्यप्रतिपादनं मध्वाचार्यैःअनेकश्रुतिवाक्यानामाधारेणकृतम्। तत्वमसिइतिअस्यउपनिषद्वाक्यस्यअर्थः पूर्ववर्तिभिराचार्यैःअन्यथैवकृतः। परन्तुमध्वाचार्यैः प्रतिपादितंयत्एतेनवाक्येनजीवेश्वर-योरैक्यमथवासादृशंनैवप्रतिपादितंभवति। एतस्यतात्पर्यंभवतियत्आत्मनि-अर्थाज्जीवेएतादृशाः सारभूतगुणाःभवन्तियत्, एतेगुणाः ईश्वरेविद्यमानैर्गुणैस्समाना भवन्तिइतिज्ञातव्यम्। उपनिषत्सुयत्रयत्रएतादृशानि वाक्यानिप्रतिपादितानि, सर्वेषांतेषांवाक्यानामीदृशाःअर्थाःएवस्वीकार्याः। कदाचितदेवएतेषां-वाक्यानांपृथग्भूतः पाठःअपिस्वीकृतःयत्-"सआत्मातत्वमसि" इतिइदंवाक्यंवस्तुतः 'सआत्माअतस्त्वमसि' इत्येवंरूपेणस्वीकार्यम्। 'अयमात्माब्रह्म' इतिअस्मिन्वाक्येऽपिमध्वाचार्या- णामयमेवाभिप्रायःप्रदर्शितः। अर्थादेतदात्मनः प्रशंसात्मकंवाक्यम् इति।

द्वैतसिद्धान्तेऽस्मिन्परमात्मनः काचित्शक्तिः स्वीकृता, तस्याःशक्त्याःनामलक्ष्मी। एषाशक्तिःस्वरूपेणपरमात्मनःसदा अधीनाएवभवति। परन्तुपरमात्मनःभिन्ना। मध्वमतेशक्ति-शक्तिमतोःमध्येअभेदोनभवति ।

एतत्सिद्धान्तानुसारेणापरमात्मास्वतन्त्रः, तथापिलोककल्याणार्थंरामकृष्णादि- रुपेषुनानावतारान्धारयति । एतेसर्वेऽपि अवताराः परिपूर्णाः भवन्ति।उक्तमेव,

अवतारादयो विष्णोः सर्वे पूर्णाः प्रकीर्तिताः ।
पूर्णं च तत् परं पूर्णं पूर्णात् पूर्णाः समुद्गताः" (मध्वबृहदभाष्यम्)

सर्वषु वैष्णवसम्प्रदायेषु पूर्णप्रज्ञदर्शनं एकमेव पूर्णतया द्वैतसिद्धान्ताधारितम्, तथाहिअस्मिन्सम्प्रदाये अद्वैतसिद्धान्तस्य लेशमात्रोऽपिप्रभावः न दृश्यते। परन्तु, वेदान्तदर्शनेअद्वैतसम्प्रदायस्यैवप्रभूतरूपेणप्रचारोजातःअस्माकंसमाजे। द्वैतसम्प्रदायस्यतावान्प्रचारो न जातः। तत्रविभिन्नानिकारणानिदृश्यन्ते। तत्रद्बैताचार्याणांसंस्कृतपाठ्यक्रमादिष्वनुत्साहः, जगत्प्रसिद्धानामाचार्यशङ्कराणांप्रसिद्धिः, राष्ट्रस्यचतसृसुदिक्षुतैर्विनिर्मितानिमठानि, तदनुतदाचार्यैःसंस्कृतविद्यालयानांदार्शनिकपाठ्यक्रमनिर्माणेविशेषाभिरुचिः, वेदान्तपाठ्यक्रमेषुकेवलमद्वैतस्यैववेदान्तस्यपाठ्यक्रमनिर्माणं, तत्रापिगतानुगतिकतयाकेवलमेकस्यैववेदान्तसाराख्यस्यअध्या-पनमित्यादीनिअन्यान्यन्यपितथाविधानिकारणानिभवन्ति। परन्तुतत्त्वतोविचार्यमाणे, आधुनिक-समाजसम्बद्धं, हिन्दु-समाजोपयुक्तंदर्शनंद्वैतमेवेतिशम्।

## 'स्वस्तिवाचनम्' संस्थाप्रशस्तिः



प्रणेता©
**प्रो. ताराशंकरशर्मा पाण्डेयः**

**संस्कृतं विश्वमञ्चे**

वाग्भूषं स्थापनार्थं प्रतिनगरमथो संस्कृतं विश्वमञ्चे
स्यात् संस्था काप्यपूर्वा बहुविधविषया चिन्तितं विज्ञवर्य्यैः।
तद्धेतोः संस्थापिता जगति सुप्रथिता श्रावणीपूर्णिमायां
पाता नः संस्कृतं वः प्रतिदिनमभितः
स्वस्तिवाग्वाचिकाख्यम्।।1।।

**ख्यापयित्री निकामम्**

योगायुर्वेदवास्तुप्रभृतिविषयकं सार्वभौमास्पदं यत्
सोद्देश्यं भारतीयं धरणिसुधिषणं ज्ञानविज्ञानसारम्।
तत्तत्त्वं विश्वविश्वेऽनुपममुपकरणैः ख्यापयित्री निकामं
बोधायैकेक्षणा स्याज्जगदुपकरणी स्वस्तिवाग्वाचिकाऽसौ।।2।।

**श्रीरमाकान्तशुक्लः**

आद्याध्यक्षो नियुक्तो बहुप्रथितयशाः श्रीरमाकान्तशुक्लः
पश्चादन्यो हि रामः करणपदयुतो व्याकृतेर्धीरवर्यः।
श्रीमान् भागीरथोऽसौ मुखपदलसितः तुल्यवागीशशास्त्री
भूयात् संस्था प्रतीता दिशि दिशि जगतः स्वस्तिवाग्वाचिकाऽसौ।।3।।

**वाग्विभूतेर्वतंसा**

विज्ञानाम्भोधिमूला मुनिमननमताऽ- ध्यात्मयोगाधिरूढा
कल्या कल्याणकर्त्री विपुलमतिमतां कल्पवल्ली कवीनाम्।
विद्वद्वृन्दाभिवन्द्या विबुधवरवृता वाग्विभूतेर्वतंसा
याधारा संस्कृतेः सा जगति विजयतां स्वस्तिवाग्वाचिकाऽसौ।।4।।

**भारतं भारतीञ्च**

नानाकार्यक्रमाणामुपचयविधिना कर्म प्रायोगिकं या
कर्तुं सोत्साहपूर्वं प्रतिदिननिरता वीक्ष्यते लोकलोकैः।
विश्वं संसेवमाना जनजनप्रसृता भारतं भारतीञ्च
राष्ट्रोत्थानोद्भवेयं जगति प्रसरतात् स्वस्तिवाग्वाचिकाऽसौ।।5।।

## महालयां समारभ्य महाष्टमी महीयते



प्रो. बनमाली बिश्वालः

सन्त्युत्सवप्रिया लोके भारतीया विशेषतः।
उत्सवानां समेषां च मूले देवार्चनं पुनः।।
भारतीयोत्सवेष्वेव नवरात्र्योपि काश्चन।
नवरात्रिश्च चौत्रेपि शारदीया क्वचित्पुनः।।
आषाढ़े चापि गुप्ताख्या नवरात्रिस्तु पाल्यते।
एवं हि नवरात्र्यस्तु तिस्रो भवन्ति मुख्यतः।।
तिसृषु नवरात्रिषु शारदीया विशिष्यते।
अस्यां वै नवरात्र्यां च दुर्गादेवी समर्च्यते।।
शरदः नवरात्र्यान्तु महत्शब्दो विशिष्यते।
महालयां समारभ्य महाष्टमी महीयते।।
महती सप्तमी चात्र नवमी महती पुनः।
महती दशमी लोके दशहरा निगद्यते।।
देव्यागमनसन्देशः काशपुष्पैः प्रदीयते।
लसन्ति काशपुष्पाणि क्षेत्रेष्वथ वनेष्वपि।।
पारिजाताख्य-पुष्पाणि गृहोद्यानेषु भान्ति च।
रोचन्ते शुक्लपुष्पाणि महादेव्यै च सर्वथा।।
ऋतुषु चौव सर्वेषु शरदृतुर्विशिष्यते।
महौषधिप्रभावस्तु ऋतावस्मिन् महीयते।।
शरदि पूर्णिमायान्तु चन्द्रात्सुधा प्रवर्षति।
चन्द्रकिरणयोगेन पायसममृतायते।।

## रामायणं पठ्यताम्



डॉ. शशिकान्ततिवारी
'शशिधर'

त्यागभावो विशिष्टोद्भुतः कीदृशः
सत्यधर्मस्वरूपं सखे! कीदृशम्।
ज्ञातुमिच्छा त्वदीया भवेच्चेत्क्वचित्
श्रेष्ठरामायणं पठ्यतां श्रद्धया।।०१।।
भ्रातृप्रेमस्वरूपं ध्रुवं कीदृशं
पुत्रकर्तव्यसन्निष्ठता कीदृशी।
स्याद्धि वाञ्छात्र ते शिक्षितुं शीघ्रतः
पूज्यरामायणं पठ्यतां चेतसा।।०२।।
श्रेष्ठभार्यासमस्ता गुणाः कीदृशाः
श्रेष्ठभर्तुस्स्वभावो भवेत् कीदृशः।
सत्यप्रेमस्वरूपं सुसम्बोधितुं
भव्यरामायणं पठ्यतां भावतः।।०३।।
भक्तिभावोद्भुतः कीदृशो जायते
स्वामिसेवा कथं साध्यते पावनी।
ज्ञातुमिच्छा भवेच्चेत्त्वदीया सखे!
दिव्यरामायणं पठ्यतामेकदा।।०४।।
जीवनं मूलतः किं सुसाध्यञ्च किं
विश्वमेतत्प्रपञ्चात्मकं वै कथम्।
गुह्यगुह्यं समस्तं सखे! बोधितुं
सत्यरामायणं पठ्यतामेकदा।।०५।।
लोकमर्यादनं कथ्यते किं सखे!
प्रकृतेः रक्षणं जायते वै कथम्।
मातृभूमेस्स्वरूपं त्वया शिक्षितुं
नैजरामायणं पठ्यतां नित्यशः।।०६।।
व्यस्तकालेषु कालो न निस्सार्यते
दीयते ग्रन्थपुञ्जाय कालो नहि।
कापि चिन्ता भवेन्नैव ते मानसे
चादिरामायणं पठ्यतां केवलम्।।०७।।
भारतं कीदृशं कीदृशी संस्कृतिः
वेषभूषान्नपानादिकं कीदृशम्।
मातृभूर्मेमहत्त्वं त्वया शिक्षितुं
श्रेष्ठरामायणं पठ्यतां श्रद्धया।।०८।।
शत्रुभिः शत्रुता मित्रता मित्रकैः
भ्रातृभिर्भ्रातृता सेवकैस्स्वामिता।
भाल्यते वै कथं ज्ञायते नो तदा
पूज्यरामायणं पठ्यतां निष्ठया।।१०।।
नाधिकं वच्मि वर्ता सखे श्रूयतां
मानवत्वस्य सत्संविधानं प्रियम्।
वर्तते भूमिभागेत्र चौकं ध्रूवं
तद्धि वाल्मीकिरामायणं शाश्वतम्।।११।।
व्यर्थमेव त्वया पठ्यते श्रद्धया
भिन्नभिन्नानि काव्यानि नित्यं शशिन्!।
काव्यदिव्यं रसं पातुमिच्छास्ति चेत्
सिद्धरामायणं पीयतां हे कवे!।।१२।।

## शिव-एकाक्षरी

गणपतिजनकमदनबलहरणसुगिरिवरभवनपशुपतिसुचरण!
विधिहरिमुनिनरखलपतिनिशिचर इह तव महिमजबलमनुभवति।
दशमुखगुरुवरनिजजनशिवकरपतितसुगतिकरभुवनविचरण!
शिव हर जडमतिहर निज हृदि धर शशिधर शशिधरमयि हरचरण!।।01।।
निशिचरपतिदशवदनविबुधवर इह सुरवर प्रभुवर ननु वदति
निजकरहतनिजसकलवदन इह तव शुभचरणकमलमयि भजति।
सकलभुवनभयमपनय हृदि मम वस कुरु शिवमयि सुरपतिशरण!
हर शिव जडमतिहर निजहृदि धर शशिधर शशिधरमयि हरचरण!।।02।।
जगति विविधविधबलिपतिसुरपतिगुणिपतिधनपतिरपि गुरुचरण!
तव शुभचरणकमलदलजलमयि! पिबति च बहुविधसुखमनुभवति
कथमपि हर मयि पतितविपद इह दय मयि दय मयि रिपुदलहरण!
शिव हर जडमतिहर निजहृदि धर शशिधर शशिधरमयि हरिचरण!।।03।।

संस्कृत गजल

## कामयेऽहम्



**-कौशल तिवारी**

कदाचित्तु युद्धं कर्तुं कामयेऽहम्
कदाचिद् बीजानि वप्तुं कामयेऽहम्-1
विरम कथाकार! किंचिद्विरम कथायां
निजकथां स्वयमेव वक्तुं कामयेऽहम्-2
ईशेन रचितोऽयं लोकस्तथाऽहम्
अधुना स्वलोकेशं कर्तुं कामयेऽहम्-3
विस्मृताः संवादा मया नाटके पूर्वं
नेपथ्यान्मंचं प्रवेष्टुं कामयेऽहम्-4
सर्वमपि पण्यमस्ति संसारविपण्यां
स्वकीयभावना विक्रेतुं कामयेऽहम्-5
सहसा मध्ये चलन्नाटकमवरुध्य
मञ्चमागत्याभिनयं कर्तुं कामयेऽहम्-6
आगमने कदाचित्तु विलम्बं कुरु
कदाचित् प्रतीक्षां कर्तुं कामयेऽहम्-7

## स्यान्नवं गेहमेकं हि चंद्रे मम

डा. विपिनकुमारद्विवेदी

स्रग्विणी भारते लंदनेमेरिकायां च वा,
रूसचीनादिदेशेषु रम्याणि भोः।
निर्मितानि प्रभूतं गृहाणि श्रमैः,
स्यान्नवं गेहमेकं हि चंद्रे मम।।१।।
भारते चोष्णता मां भृशं बाधते,
शीतता हा विदेशस्य पीडाकरी।
लोककोलाहलैः मे च खिन्नं मनः,
स्यान्नवं गेहमेकं हि चंद्रे मम।।२।।
रिक्तता नैव मार्गे क्वचिद्दृश्यते,
यानसंदोहपूर्णा धरा सर्वतः।
धूम्रधूमायिते नास्ति चेतो भवे,
स्यान्नवं गेहमेकं हि चंद्रे मम।।३।।
पादपाश्छिद्यमानाः क्वचित्पर्वताः,
शोष्यमानाः क्वचित्सर्वनद्यो भुवि।
काननं कृत्रिमं मां विदूनाति हा,
स्यान्नवं गेहमेकं हि चंद्रे मम।।४।।
राजनीतेस्सरिन्मग्नचित्तास्समे,
संविभक्ता दलेषु क्व देशे रतिः।
चत्वरे चत्वरे पश्य चांदोलनम्,
स्यान्नवं गेहमेकं हि चंद्रे मम।।५।।
बालकश्चेद्बलाद्याचते भूरिशः,
मोदकं चन्द्ररूपं प्रिया कुंकुमम्।
सांत्वनादानशक्तो भवेयं तदा,
स्यान्नवं गेहमेकं हि चंद्रे मम।।६।।
सर्वसौख्यं धराया मयालोकितम्,
नैव वांछापरा शिष्यते सांप्रतम्।
कामनैकाधुना राजते चेतसि,
स्यान्नवं गेहमेकं हि चंद्रे मम।।७।।
इन्दुधाम्नो गवाक्षाद् धरादर्शनम्,
जीवनस्याद्भुतं स्यात्सुखं मत्कृते।
प्राणिनो वीक्ष्य मां नूतनोयं च कः,
स्यान्नवं गेहमेकं हि चंद्रे मम।।८।।
चंदुनाम्ना प्रसिद्धोपि लोकेभितः,
केशपालित्यहेतोर्जनैः कथ्यते।
स्युर्न केशाश्शशी मे समीपे भवेत्,
स्यान्नवं गेहमेकं हि चंद्रे मम।।९।।
रात्रिनाथो हिमांशुस्समैरुच्यते,
रात्रिकाले नवोद्योगकार्ये रतः।
लग्नचित्तो भविष्यामि विद्युच्युतः,
स्यान्नवं गेहमेकं हि चंद्रे मम।।१०।।

## त्रिपुरा- महात्म्य



**-डॉ. मनीषाशर्माः**
प्राचार्या, राजस्थानशिक्षकप्रशिक्षणविद्यापीठ, जयपुरम्

कलये करुणापाङ्गी कारणमकूर्त्यैककारणीभूतम् ।
कामेश्वरीं न हीतरदेवं कञ्चित् कदाचिदभियाचे ।। १ ।।
अभियाचे परमां तामङ्कुशपाशप्रसूनचापकराम् ।
अलमलमनुत्तराम्बाचरणादन्येन देवताऽऽख्येन ।।२।।
गृह्यन्ते त्रिपुरायाः करुणकल्लोलवासितकटाक्षाः ।
सर्वोपरि लोकेऽस्मिन् पश्याम्यम्बामिहैकरूपां ताम् ।।३।।
ईप्सितमनीप्सितं वा ममाऽस्तु सततं त्रिमूर्तिजनयित्र्याः ।
ईहाशून्याया तो करोमि शरणं ततोऽन्यदेवगणम् ।।४।।
ललतु हृदि सैव देवी मम नित्यं या महेशसंसेव्या ।
ललिता राज्ञी मान्या कदापि सेव्याऽस्तु देवता मान्या ।।५।।
हर्षयतु मामजस्रं हरिहरमुख्यैः समाश्रिताऽङ्घ्रियुगा।
या च हयारूढाख्या सेनानेत्री नमामि तां ब्रूयाम् ।।६।।
रक्षतु मामिक्षुधनुः पुष्पशराढ्यकृपेक्षया सततम् ।
कामेश्वराऽभिरामा नाऽन्या ममेश्वरी भवति ।।७।।
अङ्कुरयतु हृदि भक्तिं निजपदयुगले सदा महेशानी ।


### पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249**

# संस्कृतवाङ्गमयपद्यानि पठनाय संस्कृतछन्दोज्ञानं परमावश्यकम्-आचार्यः शैलेशकुमारतिवारी

वार्ताहरः - आचार्यः विशालप्रसादभट्टः

अनौपचारिकसंस्कृतशिक्षकः,केन्द्रीयसंस्कृतविश्वविद्यालयः,नवदेहली त्रयोविंशत्यधिकद्विसहस्रतमाब्दस्य नवम्बरमासस्य पञ्चमे दिनाङ्के,रविवासरे आभासीयसंस्कृतच्छन्दसः कार्यशालायाः समापनसमारोहः सुसम्पन्नो जातः। कार्यक्रमस्य सञ्चालकेन अतिथीनां परिचयपुरस्सरं वाचिकं स्वागताभिनन्दनं विहितम् । कार्यक्रमस्य मुख्यातिथिः हरिद्वारम् तस्य उत्तराखण्डसंस्कृतविश्वविद्यालयस्य वेदवेदाङ्गसंकायाध्यक्षः



व्याकरणविभागाध्यक्षश्च आचार्यः शैलेशकुमारतिवारिवर्यः समुपस्थितः आसीत्। कार्यक्रमाध्यक्षारूपेण वसन्त-कन्या-स्नातकोत्तर-महाविद्यालयः,कमच्छा,वाराणसी इत्येतस्य संस्कृतविभागाध्यक्षचरा आचार्याः कमला पाण्डेया - महोदया समुपस्थिता आसीत्। तत्र कार्यक्रमस्यास्य शुभारम्भः वैदिकमङ्गलाचरणेन कृतम्। तदनु सरस्वतीवन्दनां गीतवती। तदनन्तरं संस्कृतस्वागतगानेन अतिथीनां स्वागतं कृतवती। तदनु मम संस्कृतम् इत्यस्याः यूट्युबवाहिन्याः संस्थापकेन अस्याः कार्यशालायाः संयोजकेन आचार्यगोपालमिश्रवर्येण अतिथीनां स्वागतं विधाय कार्यशालायाः समग्रमपि वृत्तं प्रस्तुतम्। वृत्तकथने संयोजकेनोक्तं यदियं छन्दसः कार्यशाला अक्टुबरमासस्य नवमदिनाङ्कादारभ्य नवम्बरमासस्य पञ्चमदिनाङ्कं यावत् समायोजिता। कार्यशालायामस्यां नैके विद्वांसः समागत्य चतुर्दश-छन्दसां प्रशिक्षणं प्रदत्तवन्तः। भारतस्य विभिन्नेभ्यः राज्येभ्यः प्रतिभागिनः निःशुल्कं पञ्जीकरणं कृत्वा छन्दसां ज्ञानं प्राप्तवन्तः। अनन्तरं क्रमशः मनीषा वैद्या,नीतू ,सन्ध्या गुप्ता, सुरेशः ध्यानी, चेत्येते प्रशिक्षार्थिनः कार्यशालायाः स्वानुभवं प्रकटितवन्तः। पश्चाच्च आनन्दिता कुमारी, विपुलः,दीनदयालः सैनी,श्वेता कुमारी, प्रियांशी, पूजा कुमारी च नैकेषु छन्दसु नैकान् श्लोकान् गीतवन्तः। अनन्तरं नीलाक्षी श्रीवास्तवा मे जनगणराष्ट्रनिवासिनः इति संस्कृतदेशभक्तिगीतं प्रस्तुतवती। तत्रावसरेस्मिन् कार्यक्रमस्य मुख्यातिथिना आचार्येण शैलेशकुमारतिवारिवर्येण स्वीयोद्बोधने प्रोक्तं यत् छन्दस् इति शब्दस्य निष्पत्तिः चदि (आह्लादने)- 'असुन्' आदेः छकारादेशश्च इत्थं प्रकारेण भवति। शब्दोयं 'चदि' आह्लादने , छदि ,आवरणे आच्छादने वा इति धातुना निष्पन्नो भवति। यस्यार्थो आच्छादनं नियमनं च भवति। छन्दांसि छादनात्छन्दयति असुन् इति छन्दः (वेदे भावे असुन्)। छादयति वा एनं पापात् कर्मणः इति छन्दः। यत् छदयति (आवरणयति)भावान् रसान् अलङ्कारादींश्च तच्छन्दः। अस्माकं काव्यशास्त्राणि पुराणानि च छन्दोबद्धानि सन्ति। यतो हि पद्यमयी वाणी श्रवणेपि सुमधुरा भवति। छन्दोमयपद्यानि स्मरणाय च सरलानि भवन्ति। सर्वप्रथमं संस्कृतछन्दोनिर्माणकौशलप्राप्तये संस्कृतभाषाज्ञानं परमावश्यं भवति।अभिप्रायस्य अभिव्यक्तिः तदैव संस्कृतेन कर्तुं शक्यते। तदर्थं संस्कृतशब्दानां पर्यायवाचिपदानि ज्ञातव्यानि तेषां च संकलनम् अभ्याशश्च करणीयः। तदनु क्रियापदान्यपि ज्ञातव्यानि। सर्वेषामपि धातूनां दशसु लकारेषु रूपाणि ज्ञातव्यानि। तदा छन्दसां रचना सरलतया कर्तुं शक्यते। पुनश्च महोदयः स्रग्विणी छन्दसि पद्यरचनां विधाय सरलतया छन्दोनिर्माणमपि बोधितवान् येन प्रतिभागिनः छन्दोज्ञानं प्राप्य अत्यन्तं सन्तोषं प्रकटितवन्तः। तदनन्तरं कार्यक्रमस्यास्य अध्यक्षा आचार्या कमला पाण्डेया - महोदया अध्यक्षीयोद्बोधने प्रोक्तवती यदहं कार्यक्रमस्य प्रशिक्षार्थिनां मुखात् विविधछन्दसु विविधान् श्लोकान् कार्यशालानुभवं च श्रुत्वा अत्यन्तम् आनन्दमनुभवामि। पुनश्च महोदया प्रशिक्षार्थिनां श्लोकोच्चारणगतदोषाणां परिमार्जनं विधाय परिष्काराशांन् चापि बोधितवती। महोदयया प्रोक्तं यत् सर्वादौ महाकविकालिदासविरचितानि काव्यानि पौनः पुण्येन पठनीयानि तदा काव्यरचनायोग्यतासामर्थ्यं समुत्पाद्य उत्तमोत्तमं काव्यं रचनीयम्। येन अस्माकं रचितं काव्यमपि कल्पान्तजीवितं स्यादिति। श्रीशिवम् चतुर्वेदिना सर्वेषां कृते धन्यवादज्ञापनं कृतम्। अन्ते श्रीसुरेशध्यानी शान्तिमन्त्रेण कार्यक्रमस्य सम्पूर्तिं कृतवान्। कार्यक्रमेस्मिन् गूगलमीटमाध्यमेन 45 प्रतिभागिनः श्रोतारश्चोपस्थिताः आसन्। कार्यक्रमस्य सफलतया सञ्चालनं आचार्यविशालप्रसादभट्टेनोक्तम्। जयतु संस्कृतं विश्वपोषकम्।

# श्रीजगन्नाथसंस्कृतविश्वविद्यालये 'श्रीजगन्नाथचेतनायां शैवतत्त्वम्' इति विषये राष्ट्रियसंगोष्ठ्यां

भुवनेश्वर। दि.०५-११-२०२३ रविवासरे पुरी-श्रीजगन्नाथसंस्कृतविश्वविद्यालये 'श्रीजगन्नाथचेतनायां शैवतत्त्वम्' इति विषये राष्ट्रियसंगोष्ठ्यां सम्मानितातिथिरूपेण समुपस्थितः।



भुवनेश्वर-श्रीजगन्नाथसंस्कृतिगवेषणापरिषदः सम्पादकः डा.मथुरेन्द्रपृष्टिः, मुख्यवक्ता प्रोफेसर ध्रुवचरणनायकः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य प्राभारी कुलपतिः प्रोफेसर शतृघ्न पाणिग्राही, सभापतिः प्रोफेसर नित्यानन्द साहुः, विशिष्टातिथिः डा. विजयनारायण रामानुजदासः, पुरी- श्रीजगन्नाथचेतनागवेषणाप्रतिष्ठानस्य सम्पादकः डा. नरेशचन्द्रदाशप्रभृतयः समुपस्थिताः। उद्घाटनसमारोहे डा. मथुरेन्द्र पृष्टिः 'दारुब्रह्म' सम्मानम्, श्रीसारङ्गधररायगुरुः 'शिलाब्रह्म' सम्मानम्, डा. श्रद्धाञ्जलिकानुन् गो 'शून्य ब्रह्म' सम्मानम् , डा.भास्करमिश्रश्च 'ज्योतिर्ब्रह्म' सम्मानं च प्राप्तवन्तः। प्रायः २५ गवेषकाः शोधपत्राणि पठितवन्तः। 'श्रीजगन्नाथचेतनारे वैष्णव तत्त्व' तथा 'श्रीविष्णुसहस्रनाम' इति पुस्तकद्वयं लोकार्पितम्।

# "आनलाइनसंस्कृतभाषाशिक्षणकक्षाणाम् नवम्बरमासस्य चक्रारम्भः"

वार्ताहरः-नूतनविष्णुः रेग्मी (प्रकृतिसाधुः)

लखनऊ। उत्तरप्रदेशसंस्कृतसंस्थानम्-लखनऊ-द्वारा 2023-तमवर्षस्य





नवम्बरमासस्य तृतीये दिनाङ्के विंशतिदिवसाय(प्रतिदिनं एकघाण्टात्मककालाय) प्रथमस्तरीयसंस्कृतभाषाशिक्षणस्य एवं द्वितीयस्तरस्य च शुभारम्भः (समुद्घाटनसमारोहः)बहुत्र संजातः।

एतस्मिन् एवं क्रमे गोरक्षपुरतः अपि उत्तरप्रदेशसंस्कृतस्थानस्य भाषाप्रशिक्षकः नूतनविष्णुः रेग्मी गूगलमीट्माध्यमेन सायं 7 वादने द्वितीयस्तरीयसंस्कृतभाषाशिक्षणस्य कक्ष्यायाः शुभारम्भमकरोत्। यत्र बहवः पंजीकृतच्छात्राः विभिन्नेभ्यः स्थानेभ्यः पठितुमागताः। तत्र देशतः एवं विदेशत : अपि 50 संस्कृतानुरागिणः छात्राः समागतवन्तः। सर्वादौ मंगलमादाय नूतनविष्णुः रेग्मी (संस्कृतभाषाप्रशिक्षकः)संस्कृतकक्ष्यायाः नियमान् अश्रावयत् । केचन प्रशिक्षवः स्वपरिचयं उक्तवन्तः।कक्षागमनस्य कारणमपि ते उक्तवन्तः।

ततः सः प्रथमदिनस्य पाठं पीपीटी-माध्यमेन पाठितवान।कक्ष्या प्रतिदिनं सायम् 7 वादनतः 8 वादनपर्यन्तं चलिष्यतः। 25 नवम्बर 2023 पर्यन्तम् कक्षायाः अवधिः ।संस्कृतसंस्थाने प्रातः 8 वादनतः रात्रौ 9 वादनपर्यन्तं बह्व्यः कक्षाः संस्थानस्य बहवः प्रशिक्षकाः चालयन्ति। कार्यक्रमे संस्थानस्य कार्यकारि-अध्यक्षः जितेन्द्रकुमारः, निदेशकः विनयश्रीवास्तवः,अधिकारिणौ जगदानन्दझा एवं चन्द्रकलाशाक्या,प्रशिक्षणप्रमुखः सुधीष्टकुमारमिश्रः, प्रशिक्षणसमन्वयकाः धीरजमैठाणी, राधाशर्मा दिव्यरंजनश्चोपस्थिताः आसन्। अन्ते परीक्षा अपि भविष्यति । उत्तीर्णवद्भ्यः प्रमाणपत्राणाम् वितरणस्य व्यवस्थापि संस्थानेन कृता अस्ति।उत्तरप्रदेशसंस्कृतसंस्थानेन संचालितकक्ष्याभिः एतावता बहवः उपकृताः।विशेषतः ये विद्यालयादिषु TGT@PGT इत्यनयोः कृते सज्जतां कुर्वन्ति तेऽप्यत्र पठितुमागच्छन्ति।एतया योजनया अग्रेऽपि जनाः उपकृताः भविष्यन्ति एव।शीघ्रमेव तृतीयस्तरस्यापि शुभारम्भः भविष्यति । तस्य पाठ्यक्रमनिर्माणम् अपि जातम् अस्ति ।शीघ्रमेव तस्य आरम्भः अपि भविष्यति इति सम्भावना।

ये एतां निःशुल्क-कक्षामागन्तुकामाः ते "sanskritsambhashan.com" इति लिंक् उद्घाट्य तत्र स्वानुकूलतया मासं (दिसम्बर/जनवरी ) 2023/2024 अनुकूलसमयं च चीत्वा स्वस्य नामांकनं कारयितुं शक्नुवन्ति।ये प्रथमस्तरं पठितवन्तः विशेषतः तेभ्यः अन्येभ्यश्च द्वितीयस्तरस्य प्रशिक्षणमपि संस्थानेन दीयते ।परीक्षायाम् 33% उत्तीर्णवद्भ्यः शिक्षार्थिभ्यः 75% उपस्थितेभ्यः प्रशिक्षुभ्यः प्रमाणपत्राणि अपि दूरवाणीसन्देशमाध्यमेन प्रेषणव्यवस्था अस्ति। केभ्यश्चित् मासेभ्यः उत्तरप्रदेशसंस्कृत संस्थानं "गृहे गृहे संस्कृतम् "इति योजनायाः समारम्भं कृत्वा संस्कृतस्य प्रचारे प्रसारे च विशिष्टं योगदानं कुर्वत् अस्ति। अस्मिन् मासे 42 प्रथमस्तरीयाः कक्षाः, 10 द्वितीयस्तरीयाः कक्षाः आहत्य 52 कक्षाः सन्ति।तत्र 2940+610= 3550 छात्राः सन्ति ।तेषु प्रथमदिवसे 1908 उपस्थिताः। तत्र 52 शिक्षकाः पाठयन्तः सन्ति।ये द्वितीयस्तराय स्वस्य निःशुल्कं नामांकनं कर्तुमिच्छन्ति तेभ्यः नामांकनलिंक् "https://sanskritsambhashan.com/second_level_reg.php" इत्यस्ति। उद्घाटनसत्रस्य अन्ते नूतनविष्णुः शान्तिमन्त्रेण सत्रस्य समापनमकरोत्।

# वैदिकगणायोजितप्रतियोगितापरिणामः

वैदिकपरम्परायाः प्रचारं कुर्वन् आश्विन नवरात्रेश्शुभावसरे "श्रीशिवशक्तिशतकम्" इति पुस्तकाधारेण वैदिकगणेनायोजितायां




राष्ट्रीयस्तरीय प्रतियोगितायां प्रथमस्थानं आचार्य पवनशास्त्री प्राप्नोत्तथा द्वितीयस्थानं शिवकुमार शर्मा "शिवा" तृतीयस्थानं हनुमन्तशर्मा प्राप्नोत। ध्यातव्यो वर्तते यूट्यूब-दृश्यानामाधारेण विजेतायाः निर्णयोऽभवत्। प्रथमपुरस्कारराशिः २१००, द्वितीयपुरस्कारराशिः ११००, तृतीयपुरस्कारराशिः ५०० रुप्यकाणि च निर्धारितान्यासीत्। एतादृशी प्रतियोगितास्माकं वैदिकगणेनायोजिता प्रथमा प्रतियोगितासीद्भविष्येऽपि एतादृशी प्रतियोगिताः भविष्यन्ति याभिर्विश्वे संस्कृतभाषाप्रचारप्रसारो भविष्यतीति कामये।

# पांडुलिपि-संरक्षण-संवर्धनकार्यक्षेत्रे राजस्थानसंस्कृतअकादम्याः-सर्वोपरि स्थानम्

**जयपुरम्।** राजस्थानसंस्कृतअकादमी, वैदिकहेरिटेज एवं पांडुलिपिशोधसंस्थान, जयपुर द्वारा हस्तलिखित ग्रन्थस्य संपूर्ण राजस्थाने सर्वेक्षणं कृत्वा तत्संपादनं संरक्षणं च विहितम् । राजस्थानसंस्कृतअकादम्याः अध्यक्षस्य डॉ. सरोजकोचरस्य मार्गदर्शने सम्प्रति 120000 पांडुलिपीनां सर्वेक्षणं कृतम्। अकादमी निदेशकः डॉ. राजकुमारजोशी अवदत् यत् जयपुर, जोधपुर, बीकानेर, उदयपुर इत्येषु पांडुलिपिसर्वेक्षणं कृतम् सताः संरक्ष्य महत्वपूर्ण अप्रकाशित ग्रन्थानां प्रकाशन सूची सज्जा। तत् अनुसंधानात्मक प्रकाशनं विहितम्। राष्ट्रियपांडुलिपिमिशन इति भारत सर्वकारस्य परियोजनान्तर्गतं सूचीकरण कार्यं विधाय जन सामान्यस्य कृते वेबसाइट मध्ये अपलोड क्रियते। विभिन्न प्राचीन लिपिषु उपलब्ध पांडुलिपीनाम् अवगमन दृष्ट्या लिपिविशेषज्ञ समन्वयकः डॉ सुरेंद्रकुमार शर्मा जोधपुर, जसवंतगढ़, जयपुर इत्येषु लिपी प्रशिक्षण पाठ्यक्रमं राजस्थानसंस्कृतअकादमी माध्यमेन चलितवान्स कार्यक्रमेस्मिन् शाधार्थिभिः छात्राभिश्च रुचि पूर्वकं प्रशिक्षणं प्राप्तम्। प्राच्यविधासंरक्षणे संवर्धने च राजस्थानसंस्कृतअकादमी अत्यंत प्रशासनीयं कार्यं करोति।























अस्माकं प्रेरणास्रोतः– स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः–डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी
सम्पादिका–मञ्जूशर्मा, सम्पादकमण्डलम् – डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ–वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. – 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली–53तः मुद्रापयित्वा ए–2/32, वजीराबादमार्गः भजनपुरा, देहली–53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।